2.5

दिषु प्रसङ्गात्; किं तर्हि निमित्तम्? "[1]अनादिरप्रयोजना चाविद्या" इत्युक्तम्; तत्र च हेत्वनुयोगो निरवकाशः; विपर्यासतत्संस्कारयोश्च परस्परहेतुफलभावेन व्यवस्थानान्न दोषः; अतो विपर्ययज्ञानस्य निवृत्तिर्विद्यया साध्येति तत्र ज्ञानस्य सहकार्यपेक्षा स्यात्। एतच्च वार्तम्; न खलु शुक्तिकादिषु विपर्यासपुरःसरं [2]समुपजातसम्यग्ज्ञानास्तन्निवृत्तये पृथक् प्रयतन्ते, सहकारि वान्यदपेक्षन्ते; यतो विरोधिभावान्तरोत्पाद एव पूर्व[3]प्रध्वंसः, न शून्यम्; अन्यथा न प्रध्वंसो हेतुमान् स्यात्; विरोधिनी च विद्या विपर्ययज्ञानस्य। तदुत्पत्तौ विपर्यासो नष्ट एव भवति। अथोच्येत—कर्माणि बन्धहेतवः; तत्क्षयो ज्ञानात् सहकारिसव्यपेक्षादिति; तच्च न; यावदविद्यं कर्मफलविभागव्यवहारमात्रम्; तस्य प्रमृष्टाशेषविशेषविशुद्ध[4]ज्ञानोदये कुतः संभवः? तथा च विपर्याससंशयाभ्यां तुल्यवत् प्रसंख्यातानि कर्माणि—

"[5]भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥" इति।

अथ विज्ञानवैमल्यायान्यापेक्षा; सापि मुधा, संशय[6]विपर्यासयोर्ज्ञानमलयोः प्रमाणोत्थविज्ञानेऽसंभवात्। अथ मतम्—शाब्दज्ञानादन्यदपि प्रत्यक्षं ज्ञानमिष्यते विगलितविभागोद्ग्राहं सर्वविकल्पातीतम्; तस्य हि ब्रह्म गोचरः, न शाब्दस्य विभक्तपदार्थसंसर्गोद्ग्राहिणः; तदुत्पत्तौ कर्मोपासनाद्यपेक्षेति। कः पुनरस्य विशेषः, येन तदर्थ्यते? स्पष्टाभत्वम्, न तस्योपयोगः; ज्ञानं हि ज्ञेयाभिव्याप्तये, शाब्दज्ञाने चोत्पन्ने आप्तमेव ज्ञेयम्; प्रमितेः प्रत्यक्षपरत्वात् तत्र [7]च नैराकाङ्क्ष्यात् तदर्थ्यत इति चेत्, एतदधिगते प्रमेये किमन्यदा[8]काङ्क्ष्येत? प्रमाणान्तरमिति चेत् न, प्रमेयसिद्ध्यर्थत्वात्तदाकाङ्क्षायाः; पुनः सिद्ध्यर्थमिति चेत् न, पूर्वस्मादप्यसकृत्तत्सिद्धेः; सिद्धस्य च सिद्ध्यपेक्षायां न हेतुरस्ति। उपायान्तरसद्भावश्चेत्, उपायान्तरं तर्ह्यपेक्ष्येत; प्रमेये तु नैराकाङ्क्ष्यमेव। [9]प्रीतिविशेषश्चेत्, स पूर्वप्रमाणजादपि

1 . . . .
2 समुपजनित—A; उपजात—B.
3 ध्वंसः—A and B.
4 विज्ञानोदये—B.
5 Mund. 2-2-8.
6 विपर्यययोः—B.
7 B omits च.
8 आकाङ्क्ष्यते—B.
9 प्रमिति—C.

दर्शनात् सिध्यति; न तत्सिद्ध्यर्थं प्रमाणान्तरम्; प्रत्यक्षदृष्टमपीतरैस्तत्संभवात् जिज्ञास्येत, विशेषाभावात्; [1]निश्चायकत्वमितरेषामपि, प्रमाणभावात्। हानादियोग्यविषयं प्रत्यक्षम्, संनिकृष्टार्थत्वात्, नेतराणीति चेत्; संनिकर्षहेतुस्तर्ह्यपेक्ष्यताम्; न [2]प्रमाणम्, सिद्धत्वात् प्रमायाः। प्रकृते च प्रमेये नैष विशेषोऽस्ति। सामान्यविषयाः शब्दादयः, विशेषविषयं प्रत्यक्षमिति चेत्; अनधिगत एव तर्हि शब्देन प्रत्यक्षस्य विषयः। बाढम्; उक्तमेतत्[3]—न शाब्द[4]स्य ज्ञानस्य विषयो ब्रह्मेति। यदि तर्हि न शब्देनाधिगतं ब्रह्म, कथं तस्मिन्नुपासना प्रवर्तताम्? न चान्यस्मिन्नुपास्यमानेऽन्यत् साक्षाद्भवति; कस्य च रूपस्य साक्षात्करणाय यज्ञादिविधानम्? शब्दोप[5]दर्शितनिरतिशयानन्दापहतपाप्मादिरूपब्रह्मस्वभावस्यात्मनः साक्षात्करणाय यज्ञादिविधिरुपपद्यते; अविदितपुरुषार्थरूपे तद्विपरीत[6]रूपे वा तस्मिंस्तद्विधिरसदर्थः। तस्मादपहतपाप्मत्वादिगुणब्रह्मस्वभाव आत्मनि निर्विचिकित्सात् प्रमाणात् प्रकटतां प्राप्ते [7]नापरमपेक्ष्यमस्ति। नन्ववगतेऽपि "[8]तत् त्वमसि" इति शब्दाद्ब्रह्मात्मभावे प्रागिव सांसारिकधर्मदर्शनात् तन्निवृत्तये भवत्यन्यापेक्षा। नैतत् सारम्; कथं खल्ववगतब्रह्मात्मभावो विदितात्मयाथातथ्यो मिथ्यादर्शननिमित्तैर्धर्मैर्युज्यते? श्रूयते च—"[9]ब्रह्म वेद ब्रह्मैव भवति" इति। न च ब्रह्मण्यपहतपाप्मनि तेषामवकाशः; तथा—

"[10]आत्मानं चेद्विजानीयादयमस्मीति पूरुषः।
किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्॥"

तथा "[11]अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" इति। मिथ्याभिमाननिमित्तः शरीरसंबन्धः; तस्मिन् याथातथ्यदर्शनान्निवृत्तेऽशरीरत्वम्; [12]तत्र प्रियाप्रिययोरसंबन्ध आख्यायते। तस्मान्नावगतब्रह्मात्मभावः प्रागिव सांसारिकधर्मभाक्; यस्तु तथा, नासाववगतब्रह्मात्मभाव इति।

---

[1] निश्चयात्मकत्वम् is the reading found in the MSS. of the text but the commentator, Śaṅkhapāṇi, gives two readings निश्चायकत्वम् and निश्चायकत्वे.

[2] प्रमाणान्तरम—B.

[3] मेवम्—B.

[4] B omits स्य.

[5] शब्दोपप्र—A and C.

[6] B omits—रूपे.

[7] न पर—B.

[8] Chānd. 6-8-7.

[9] Muṇḍ. 3-2-9.

[10] Bṛh. 4-4-12.

[11] Chānd. 8-12-1.

[12] ततः—B.

अत्रोच्यते—निश्चितेऽपि प्रमाणात् तत्त्वे सर्वत्र मिथ्यावभासा निवर्तन्ते, हेतुविशेषादनुवर्तन्तेऽपि; यथा द्विचन्द्रदिग्विपर्यासादय आप्तवचनविनिश्चितदिक्चन्द्रतत्त्वानाम्; तथा निर्विचिकित्सादाम्नायादवगतात्मतत्त्वस्यानादिमिथ्यादर्शनाभ्यासोप[1]चितबलवत्संस्कारसामर्थ्यान्मिथ्यावभासानुवृत्तिः; तन्निवृत्तयेऽस्त्यन्यदपेक्ष्यम्; तच्च तत्त्वदर्शनाभ्यासो लोकसिद्धः; यज्ञादयश्च शब्दप्रमाणकाः; अभ्यासो हि संस्कारं द्रढयन् पूर्वसंस्कारं प्रतिबध्य स्वकार्यं संतनोति; यज्ञादयश्च केनाप्यदृष्टेन प्रकारेण; श्रेयःपरिपन्थिकलुषनिवर्हणद्वारेणेत्यन्ये, नित्यानां कर्मणां दुरितक्षयार्थत्वात्। स्यादेतत्—अनुवर्तन्तां मिथ्यावभासाः; प्रमाणात्तु निश्चयः; यथातत्त्वं यथानिश्चयं च व्यवहारः; तस्मान्नावगतात्मतत्त्वस्य काचन शुभाशुभा वा प्रवृत्तिरुपपद्यते। उच्यते—जातेऽपि तत्त्वदर्शने, अनाहिते च पटौ संस्कारे, द्रढीयसि [2]च मिथ्यादर्शनजे संस्कारे निश्चया अपि मिथ्यार्था भवन्ति; यथा दिङ्मूढस्याननुसंहिताप्तवचसः, प्रागिव प्रवृत्तिदर्शनात्; तथा प्रमितरज्जुभावाया अपि [3]रज्ज्वाः प्रमाणाननुसन्धाने सर्पभ्रान्त्या भयदर्शनम्[4]। तस्माज्जातेऽपि प्रमाणात् तत्त्वदर्शने अनादिमिथ्यादर्शनाभ्यासपरिनिष्पन्नस्य द्रढीयसः संस्कारस्याभिभवायोच्छेदाय वा तत्त्वदर्शनाभ्यासं मन्यन्ते। तथा च "[5]मन्तव्यो निदिध्यासितव्यः" इत्युच्यते; शमदमब्रह्मचर्ययज्ञादिसाधनविधानं च; अन्यथा कस्तदुपदेशार्थः? स्यादेतत्—ब्रह्मचर्यादिसाधनोपकरणादेवाम्नायात् तत्त्वविज्ञानम्। तदसत्; शब्दभावात् प्रतिपत्तेरुत्पत्तेः; न हि प्राक् साधनविशेषेभ्यस्तत्त्वप्रतिपत्तिपर आम्नायोऽवाचकः, नाप्यनिश्चायकः, अशेषाशङ्कानिर्मोक्षात्[6]; अन्यथा तदुपदिष्टेषु [7]साधनेष्वपि दुर्लभा प्रतिपत्तिः। अपि च अन्यथानिश्चयेऽपि रङ्गगता भरतादयो मिथ्याव[8]भासेन शोकभयादिहेतवः; निश्चितेऽपि गुलस्य माधुर्ये तत्र मिथ्यातिक्तावभासोऽवितथ इव दुःखयति, अवितथस्येव तस्यापि थूत्कृत्य [9]त्यागात्; तस्मात् तन्निवृत्तये विनिश्चितब्रह्मात्मभावेनापि साधनान्यपेक्ष्याणि;

---

[1] हित—B.
[2] B. omits च.
[3] रज्जोः—B.
[4] दर्शनात्—B.
[5] Brh. 2-4-5.
[6] मोकात्—B.
[7] साधनविशेषेष्वपि—B.
[8] भासैरेव—B.
[9] त्यागदर्शनात—B.

[1]यथैव प्रमाणात् तत्त्वाभिव्यक्तौ न मुक्तेः कार्यता, तथाभिव्यक्तिविशेषेऽपि साधनेभ्यः । श्रुतयस्त्वभ्यासपरिनिष्पत्त्यवस्थाविषयाः शब्दसाधनज्ञानापेक्षा वा भवन्तु, [2]तद्धेतुत्वादुत्तरस्य—इत्यलमतिविस्तरेण ।

यदपि—पृथक्कार्या एव कर्मविधयो ज्ञानाधिकारमवतारयन्ति, अपाकृतर्णत्रयस्य तत्राधिकारात्—तदपि न नियोगतः, आश्रमविकल्पस्य स्मरणात्— "[3]तस्याश्रमविकल्पमेके" "[4]यमिच्छेत्तमावसेत्" इति, "[5]यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत्" इति श्रवणात्; "[6]एतद्ध स्म वै तत्पूर्वे विद्वांसोऽग्निहोत्रं न जुहवांचक्रिरे" तथा "[7]किं प्रजया करिष्यामः" तथा "[8]किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे" इति कर्मत्यागदर्शनात् । प्रतिपन्नगार्हस्थ्यस्यात्मविद्ययैव कृतकृत्यतां मन्वानस्य ऋणापाकरणं प्रत्यनादृतस्य विहिताकरणनिमित्तस्य पाप्मनो विद्योदय[9]प्रतिबन्धृत्वं दर्शयति—"[10]ऋणानि त्रीण्यपाकृत्य" इति ।

इदं तु युक्तम्—कार्यान्तर[11]निराकाङ्क्षाणामपि कर्मणां संयोगपृथक्त्वात् "[12]तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन" इति विद्याङ्गभावः; सोऽप्युत्पत्त्यर्थतया, न प्रयाजादिवत् कार्योपयोगेन; विद्यायाः कार्यान्तराभावात् । संस्कारपक्षो वा, स्मृतेः; संस्कृतस्य हि विद्योत्पत्तेः; तदुक्तम्— "[13]विहितत्वाच्चाश्रमकर्मापि" इति ।

ननु दृष्टोपाय एव विद्योत्पादः; तत्र दृष्टैवेतिकर्तव्यतापेक्ष्यतां शमदमादिसाधन[14]विशेषश्चित्तविक्षेपस्य विहन्त्री, समाहितचित्तस्याभ्यस्यतो ज्ञानप्रसादोत्पत्तेः; न तु यज्ञादयः, तैर्विनाप्यभ्यासेन तत्संभवात् । सत्यम्; तथा चोर्ध्वरेतसां [15]चाश्रमिणां विनापि तैर्विशुद्धविद्योदय इष्यते; किं तु कालकृतो विशेषः; साधनविशेषाद्धि सा क्षिप्रं क्षिप्रतरं च व्यज्यते; तदभावे चिरेण [16]चिरतरेण च । तदुक्तम्—"[17]सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्"

---

1 यथैव च—B.
2 तद्बीज—B.
3 Gaut.-Dhar. 1-3-1.
4 …………
5 Jābāla. 4.
6 Kauṣ. 2-4.
7 Bṛh. 4-4-22.
8 …………
9 विद्योदयस्य—A and C.
10 Manu. 6-35.
11 निरपेक्षाणा—B.
12 Bṛh. 4-4-22.
13 Brahm.-Sū. 3-4-32.
14 विशेषादि—A and C.
15 B omits च.
16 B omits चिरतरेण.
17 Brahm.-Sū. 3-4-26.

एषोऽर्थः—“ [1]यज्ञेन दानेन ” इति श्रवणात् कर्माण्यपेक्ष्यन्ते विद्यायामभ्यासलभ्यायामपि, यथान्तरेणाप्यश्वं ग्रामप्राप्तौ सिद्ध्यन्त्यां शैघ्र्यायाक्लेशाय वाश्वोऽपेक्ष्यते ।

ननु विद्यारूपं ब्रह्मैव; न विद्या ब्रह्मणोऽन्या; तच्च नित्यमकार्यम्; तत्र कथं किंचिदपेक्ष्येत[2] ? उच्यते—यथोपधानतिरोहितरूपस्फटिकमणिरुपधानापकर्षणं [3]स्वरूपाभिव्यक्तयेऽपेक्षते तथेहापि द्रष्टव्यम्; न हि स्फटिकमणेः पूर्वरूपं विनष्टमुपधान[4]संनिधेः, तदपगमे वान्यदुत्पन्नम्; न ह्यकस्मादनेकविसभागक्षणव्यवहितस्य पूर्वसभागक्षणस्योत्पत्तिः संभवति; न ह्यग्निविगमेऽङ्गारेभ्यः पुनः काष्ठसंततिप्रवृत्तिः । तस्माद्यथैवाकार्यं स्फटिकरूपमुपधानापकर्षणमपेक्षते तथात्मरूपमपि । स्यादेतत्—ज्ञानं तत्र सापेक्षम्; तच्च स्फटिकाद्भिन्नं कार्यम्; पुरुषप्रयत्नो हि तत्र ज्ञानार्थः । किं पुनर्ज्ञानं स्वरूपेणैवार्थितम्, आहोस्विदर्थस्वभावसिद्धये ? न तावत् स्वरूपेण, अर्थेन व्यवहारात्; न [5]विज्ञानमात्रनिबन्धनो व्यवहारः, मिथ्याज्ञानेनापि प्रसङ्गात् । अथार्थस्वभावाय ज्ञानमर्थ्येत[6], तदर्थो व्यापार[7]स्तेनार्थितो भवति । न च ज्ञानादर्थे कश्चिद्विकारः, तयोरसंबन्धात्; योग्य[8]देशतायाः सर्वत्र भावात्; सर्वप्रतिपत्तृणां[9] च विदितत्वप्रसङ्गात्; ध्वस्तानागतेषु च तदसंभवात् । तस्माद्यथातिरोहितमपि तिरोहितमिवाभि[10]व्यज्यत इव प्रयत्नापेक्षम्, [11]तथात्मतत्त्वमप्यतिरोहितं[12] तिरोहितमिव प्रयत्नादभिव्यज्यत इवेति पुष्कलम् ।

संहृताखिलभेदोऽतः सामान्यात्मा स वर्णितः ।
हेमेव पारिहार्यादिभेदसंहारसूचितम् ॥ ३ ॥

यतश्च विशेषप्रत्यस्तमयमुखेन तन्निरूपणम्, अतोऽन्यैर्ब्रह्मविद्याभियुक्तैः सामान्यरूपं ब्रह्म निरूपितम्—“ [13]स एष महानज आत्मा सत्तालक्षणः” तथा “ [14]सत्तैव सर्वभेदयोनेः प्रकृतिः परा ” इति । यथा सुवर्णतत्त्वं कटकाङ्गुलीयादिविशेषोपसंहारेण निरूप्यमाणं तत् सामान्यमिति । ये वा[15]—

---

1 Bṛh. 4-4-22.
2 दपेक्ष्यते—B.
3 B omits स्व.
4 सन्निधौ—B.
5 हि for वि—B.
6 मर्थ्यते—B.
7 तेनैवार्थितः—B.
8 देशकतायाः—B.
9 वक्तॄणां—A and C.
10 व्यज्यमानमिव—B.
11 तथात्मैकत्व—B.
12 B adds अपि.
13 Cf. Bṛh. 4-4-24.
14 . . . . .
15 च—B

"[1]निर्विशेषं न सामान्यं भवेच्छशविषाणवत्" इत्यभावमाहुः, तान् प्रत्युच्यते —संहृताखिलभेद इति । यदि तावदसामान्यत्वं साध्यते सिद्धसाधनम्; विशेषाणामभावे केषां तत् सामान्यम्? सामान्यं तूक्तं ब्रह्मवादिभिः विशेष-प्रत्यस्तमयमुखेन निरूपणादुपचारतः । अथाभाव एव साध्यः, विशेषैरेवास्य निर्विशेषैर्व्यभिचार इति ।

[2]इति श्रीमन्मण्डनमिश्रविरचितायां ब्रह्मसिद्धौ

ब्रह्मकाण्डः समाप्तः ।

---

[1] Ślōka-Vārtika, page 548.

[2] इत्याचार्यमण्डनमिश्रकृतौ ब्रह्मकाण्डं समाप्तम्—A and C.

ओम्।

॥ तर्ककाण्डः ॥

ननु प्रत्यक्षादिभिर्व्यावृत्तानां भावस्वभावानामवगमान्नैकस्मिन्नद्वये शब्दः प्रमाणम्, प्रत्यक्षादिविरोधात्, [1]ग्रावप्लवनाद्यर्थवचोवत्। उच्यते—

आहुर्विधातृ प्रत्यक्षं न निषेद्धृ विपश्चितः।
नैकत्व आगमस्तेन प्रत्यक्षेण विरुध्यते ॥ १ ॥

ननु प्रमाणान्तरपरतन्त्राणां पुरुषवचसां तद्विरोधाद्युक्तमप्रमाणत्वम्; स्वतन्त्रस्य[2] त्वाम्नायस्यानपेक्षितप्रमाणान्तरप्रवृत्तेस्तद्विरोधेऽपि कस्मादप्रमाणत्वम्? आम्नायविरोधादेव तु प्रत्यक्षादीनि प्रमाणतायाः किमिति न च्यवन्ते? तुल्येऽनपेक्षत्वे न विशेषहेतुरस्ति। तत्र वृथा प्रमाणान्तरविरोधपरिहार-परिश्रम इति।

तत्र केचिदाहुः—प्रत्यक्षादिविरोधे आम्नायस्य दौर्बल्यम्, सापेक्षत्वात्; तथा हि—स्वरूपसिद्ध्यर्थमेव तावत् प्रत्यक्षादीन्याम्नायोऽपेक्षते; तथा च तेषां प्रामाण्यमनुमन्तव्यम्, तदपबाधने स्वरूपस्यैव तावदसिद्धेः; न त्वा-म्नाये प्रत्यक्षादीनां काचिदपेक्षा। दृष्टव्यभिचारत्वाच्च शब्दस्य,[3] प्रत्यक्षस्य चादृष्टव्यभिचारत्वात्। अपि च सावकाशानवकाशयोरनवकाशं बलवत्; अनवकाशाश्च प्रत्यक्षादयः, सावकाशस्तु शब्दो गौणेनार्थेन; तथा हि—शक्यमेकत्वमभेदश्रुतीनामुपचरितमवकाशो वर्णयितुम्; अविवक्षितार्थानां वा वेदान्तानां जपोपयोगोऽवकाशः; उपनिषदो वेदान्ता इति [4]वर्णितम्। किं च व्याकुलत्वादाम्नायस्य अव्याकुलत्वात् प्रत्यक्षादीनाम्; कर्मविधयो हि भेदाश्रया अभेदाश्रयाश्च वेदान्ताः परस्परपराहता असत्यपि प्रमाणा-न्तरविरोधे दुर्लभप्रामाण्याः; किं पुनरव्याहतप्रतिष्ठितप्रामाण्यप्रत्यक्षादिविरोधे। तस्मादिदमविरोधाय प्रयत्यत इति। मुख्यत्वाच्च; मुख्या हि प्रत्यक्षादयः; जातस्य जन्तोरपरकाल आम्नायः; स तैः प्रतिष्ठितार्थैरपहृतविषयः कल्पनीयार्थो बाध्यते, तदनुसारेण वार्थकल्पनामर्हति। अर्थतोऽपि च मुख्यता प्रत्यक्षादीनाम्; पदपदार्थविभागाधीन [5]आम्नायार्थपरिच्छेदः, स च प्रत्यक्षादिष्वायत्तते। अतोऽविरोधाय [6]प्रयत्यत इति।

---

[1] शिला—A and C.
[2] स्याम्नायस्य—B
[3] B omits—स्य.
[4] वर्णिताः—A; वर्णितः—B.
[5] आम्नायादर्थे—B.
[6] प्रयत्न इति—A.

अन्ये मन्यन्ते—तुल्यबलत्वेऽपि प्रत्यक्षादीनामाम्नायस्य च वस्तुनि विकल्पानुपपत्तेर्विरोधे संशयः स्यात्; तेनाविरोध उपपाद्यत इति ।

अन्यद्दर्शनम्—आम्नाय एव बलवांस्तद्विरोधे; "[1]पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्"; "[2]पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सिध्यति" इति । तथा हि—सर्वस्य निसर्गजः प्रत्यक्षादिनिबन्धनः किल विभक्तवस्तुपरिच्छेदः; तदपेक्षस्तु तत्पूर्वकोऽनिसर्गजः कस्यचिदेवा[3]गन्तुरद्वैतावगमः; स पूर्वमनुपमृद्योदेतुमशक्नुवंस्तदपबाधात्मोदीयते । इतश्च—संभवद्विचित्रविभ्रमहेतुत्वात् प्रत्यक्षादीनाम्, विगलितनिखिलदोषाशङ्कत्वाच्चाम्नायस्य; पुरुषाश्रयाणां हि दोषाणां शब्दे पुरुषाभावेऽसंभवात् । शक्यो ह्याम्नायादेवानादिरविद्यासंस्कारो विभ्रमहेतुः प्रत्यक्षादिषु संभावयितुं निश्चेतुं च देहात्माभिमान इव; न त्वेवमपौरुषेये शब्दे [4]काचिद्दोषाशङ्का; सत्यां वा प्रमाणमेव न स्यात् । प्रत्यक्षादीनां तु व्यावहारिकं प्रामाण्यम्, अविद्यासंस्कारस्य स्थेम्ना[5] व्यवहारविपर्ययाभावात्; यत्र च व्यवहारविपर्ययो न तत्र प्रामाण्यम् । शब्दे तु संभावितदोषे न तत्त्वावेदनेन प्रामाण्यम्; न व्यवहाराविपर्ययेण; अदृष्टार्थत्वात् दोषेभ्यो व्यवहारविसंवादिज्ञानदर्शनाच्च । प्रत्यक्षादीनां तु [6]व्यवहारे संवादान्न शक्यते व्यवहारविसंवादिज्ञानहेतुर्दोषः कल्पयितुम्; व्यवहारविपर्ययाद्धि स [7]कल्प्येत; तत्त्वदर्शनस्य तु वेदान्तजन्मनः प्रतिपक्षत्वात् तत्त्वप्रतिहतिमात्रहेतुरेवानादिरविद्यानुबन्धः कल्प्यते; ततो दोषानुबन्धः प्रामाण्यं चेति न विरोधः । शब्दस्तु संभावितदोषो दुर्लभप्रामाण्य एव स्यात्; दृश्यते हि दोषेभ्यो व्यवहारविसंवादिज्ञानोत्पत्तिः; तत्र दोषाशङ्कया व्यवहारविसंवादस्य शङ्कितत्वात् तत्त्वप्रतिघातस्य च, न तत्त्वावेदनलक्षणं प्रामाण्यम्, न व्यवहाराविसंवादलक्षणमिति । तस्मात् शब्दस्य प्रामाण्याभ्युपगमे प्रमाणान्तरविरोधेऽपि तस्यैव बलवत्त्वमिति सांप्रतम् । यत्तु प्रत्यक्षाद्यपेक्षणादिति, तत्रोच्यते—न प्रमितावपेक्षावत्ता शब्दस्य प्रत्यक्षादिषु, किंतु स्वरूपसिद्धौ; अन्यथा प्रमाणमेव न स्यात् । तथा च स्वकार्येऽनपेक्षत्वान्न प्रत्यक्षादिभ्यो हीयते । प्रत्यक्षादयोऽपि स्वरूपसिद्धौ नान्यानपेक्षाः; कार्ये हि सापेक्षत्वं

---

[1] Mīm.-Sū. 6-5-54.
[2] Śloka-Vārtika, page 62.
[3] वावगन्तु—A.
[4] कापि दोषाशङ्का—A.
[5] स्थेम्नो—A and B.
[6] व्यवहार—A.
[7] कल्प्यते—A.

सामर्थ्यमपकर्षतीति[1] । यच्चैतेषां [2]प्रामाण्यमनुमन्तव्यमिति, को वान्यथाह ? व्यवहाराविसंवादिलक्षणं तु तत्, न तत्त्वावेदनलक्षणम् । व्यावहारिकप्रामाण्योपेतेभ्यः प्रत्यक्षादिभ्यः सिद्धादाम्नायात्तत्त्वदर्शनम्, तद्विरोधात् तेषु तत्त्वदर्शनांशमे[3]वापबाधते, न व्यवहाराविसंवादांशम् । दृष्टं च हेतुत्वेनापेक्षिताया अपि पूर्वस्याः प्रतिपत्तेः परस्याः प्रतिपत्तेर्बलीयस्त्वम्; यथा दूरस्थेषु वनस्पतिषु हस्तिप्रतिपत्तिभ्यो वनस्पतिप्रतिपत्तेः; अपेक्षिता हि हस्तिप्रतिपत्तयो व्यक्तवनस्पतिप्रतिपत्त्या हेतुत्वेन; न तस्या इन्द्रियार्थसंनिकर्षमात्राज्जन्म, आपातेऽभावात्; न च[4] देशविशेषात्, तद्देशस्थस्यै[5]वोत्पत्तेः; तस्मात् पुरोवर्तिषु वनस्पतिषु प्रणिहितमनसः प्राच्यविपर्यासानुगतमतिसंस्कारसचिवेन्द्रियादि[6]संयोगकारिता सेति मन्तव्यम् । एवमेकादिसंख्याबुद्ध्युपाया विंशत्यादिबुद्ध्योऽप्युदाहार्याः । एवं च यदेके वर्णयन्ति— स्वयमेव व्याहता वेदान्तार्थप्रतिपत्तिः; नाभेदो भेदमन्तरेण शक्योऽवसातुम्; भेदोपाया हि तस्य प्रतिपत्तिः; तत्राभेदः समाक्षिप्तभेद एव प्रतायत इति व्याघातः—तदपास्तम्; यत उपायमाक्षिपति प्रतिपत्तिः, नोपायस्य परमार्थताम्, मिथ्याज्ञानादपि[7] तत्त्वप्रतिपत्तेः । व्यावहारिकं च भेदस्य सत्यत्वमिष्टमेवेति । व्यभिचारदर्शनं च दुष्टहेतुजन्मनोः शब्दप्रत्यक्षयोः समानम्; इतरयोरपि तुल्यमव्यभिचारित्वम् । तथानवकाशत्वमपि; यदि खल्वेकमद्वयं वेदान्तार्थः, कस्तेषामन्योऽवकाशः ? अथौपचारिकमेकत्वं तदर्थः अविवक्षितार्थता वा जपोपयोगिनाम्, तत्र विरोध एव नास्तीति बलाबलचिन्ता नावतरति । तत् कुतः सावकाशत्वेन दौर्बल्यम् ? कथं च मुख्यमर्थमतिलङ्घ्योपचरितोऽवकाशः ? कथं [8]वौत्पत्तिके शब्दस्यार्थं प्रति शेषभावे— "[9]दृष्टो हि तस्यार्थः कर्मावबोधनम्" "[10]अविशिष्टस्तु वाक्यार्थः" इति च—अविवक्षितार्थता ? प्रमाणान्तरविरोधादिति चेत्, वार्तमेतत्; न प्रमाणस्य प्रमाणान्तरापेक्षं प्रामाण्यम्, येन तद्विरोधे स्वरसं जह्यात्; तदपेक्षत्वे हि तदनुगुणतया वर्तेत । निरपेक्षस्य[11] कः प्रमाणान्तरानुसरणे

---

[1] A omits इति.
[2] अनुमन्तव्यं प्रामाण्यमिति—B.
[3] वावबाधते—B and C.
[4] A and C omit च.
[5] A omits एव.
[6] B omits सं.
[7] ज्ञातादपि—A.
[8] चौत्पत्तिके—A.
[9] Śābarabhāṣya I-1-1.
[10] Mīm.-Sū. I-2-40.
[11] स्य तु—B.

हेतुः ? लौकिकास्तु शब्दाः प्रमाणान्तरापेक्षं [1]स्वार्थमभिदधतीति युक्ता तेषां तदनुसारिणी वृत्तिः । तुल्ये त्वनपेक्षत्वे किमिति न विपर्ययः, उभयोर्वा व्याघातादप्रामाण्यम्, " [2]पौर्वापर्ये पूर्वदौर्बल्यम्" इति वा रजतज्ञानस्येव पूर्वस्य बाधः ? न खलु रजतज्ञानविरोधाच्छुक्तिज्ञानमन्यविषयमविषयं वा । कथं तर्हि वेदे गुणवादः ? यत्र श्रौतैरर्थैः प्रमाणार्थनिष्पत्तेरसंभवः, तत्र द्वितीयस्या अपि वृत्तेः शब्दानां प्रवृत्तिदर्शनात् तया प्रमाणविषयलाभः; यत्र तु शब्दाः स्वरसेन लभन्ते विषयम्, तत्र न प्रमाणान्तरविरोधादपावर्तन्ते; न ह्येषां प्रमाणान्तरनिबन्धनोऽर्थः, येन तद्वशादपावर्तेरन् ।

अथ मतम्—[3]उभयानुग्रहादेवं कल्प्यते; एवं हि शब्दः प्रत्यक्षादयश्चानुगृहीता भवन्ति; अन्यथा प्रत्यक्षादयोऽत्यन्तमे[4]व बाधिताः स्युः । नैतत् सारम्; प्रमाणसामर्थ्यानुसारेण प्रमेये काचित् कल्पना स्यात्; प्रमाणे तु स्वरससिद्धं परित्यज्य [5]कल्पनायां न निबन्धनमस्ति । तस्मात् प्रमाणानुसारेण विकल्पसमुच्चयव्यवस्थाः कल्प्यन्ते, नोभयानुग्रहात्; नोभयमनुग्रहीतव्यमिति प्रमाणमस्ति । ते एव प्रमाणे इति चेत्—यदि मतम्, न प्रमाणस्य प्रमाणान्तरादनुग्राह्यत्वम्; अपि तु स्वत एव; प्रमाणत्वादेव हि तस्य तेनार्थव्यवस्था[6]पना—यथा तर्हि ततोऽर्थोऽवगम्यते तथा व्यवस्थापनीयः; एवं तदनुगृहीतं भवति; अन्यथा बाधितं स्यात् । अप्रमाणिका चार्थव्यवस्था, ततः स्वरसेनाप्रतीतेः अन्यस्य चाभावात् । इतरेतराश्रयप्रसङ्गाच्च; प्रामाण्यात् सिद्धादर्थान्तरे प्रतीतिः प्रामाण्यान्यथानुपपत्त्या कल्पनीया, तत्प्रतीतेश्च प्रामाण्यम्; स्वरसलभ्ये त्वर्थे प्रतीतित एव प्रामाण्यमिति नेतरेतराश्रयता । तस्माद्विरोधे बाध एव पूर्वस्य प्रमाणानुसारी, तथा प्रतीतेः; नोत्तरस्य विषयान्तरकल्पना । न खलु रजतज्ञानानुग्रहाय [7]शुक्तिशकलज्ञानस्य गोचरो[8]ऽपरः कल्प्यते । न च प्रत्यक्षादीनामनन्यगतित्वादनवकाशत्वम्; या खलु रजतादिविभ्रमाणां गतिः, सा तेषामपि; यदि तेषामुपचरितः कल्पितो वा विषयः, प्रत्यक्षादीनामपि तथा; अथासत्त्वात् तस्या विषया अविद्यमानार्थाः; प्रत्यक्षादयोऽप्येवम् । तस्मादविवक्षितार्थत्वमुप-

---

[1] स्वमर्थं—A.
[2] Mim.-Su. 6-5-54.
[3] उभयत्रानु—B.
[4] मप—A.
[5] कल्पनायाः—A.
[6] पनात—A and B.
[7] शुक्तिक—A and C.
[8] अपरोऽपि—A and B.

चरितार्थत्वं वा गतिरुभयोरविशिष्टा । एतेनेदमपि पराकृतम्, [1]यदाहुः— शब्दस्य प्रमाणान्तरविरोधे दृष्टमुपचरितार्थत्वमविवक्षितार्थत्वं वा लोके; तस्मात् प्रत्यक्षादिविरोधे वेदान्तानां तथाभाव इति, प्रत्यक्षादिष्वपि तथा दर्शनादिति ।

यत्तु मुख्यत्वात् प्रतिष्ठितार्थैरपहृतविषय आम्नाय इति; अत एव बाधकः, शुक्तिज्ञानवत् । न च तदनुसारेणार्थकल्पनामर्हति, अनपेक्षत्वात्; न तदधीनमस्य प्रमाणत्वम्; न तैः संभूयकारित्वम्, [2]नाम्नायस्य प्रत्यक्षादी[3]नां चैकवाक्यभावः; परस्परानपेक्षो ह्युभयत्र बुद्ध्युत्पादः । तत्र परबलीयस्त्वं न्याय्यम्; यथोक्तम्—

"[4]पूर्वात् परबलीयस्त्वं तत्र नाम [5]प्रतीयताम् ।
अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत् ॥"

यत्र त्वेकवाक्यतया संभूयकारित्वं तत्रानुपजातविरोधितया स्वरसवृत्त्या मुख्ये स्थिते, प्रथमया वृत्त्या तदेकवाक्यत्वं प्रतिपत्तुमशक्नुवन्ति तदपेक्षितार्थसमर्पणानुपपत्तेः परपदानि द्वितीयया वृत्त्या पूर्वापेक्षितमर्थं समर्पयन्त्येकवाक्यतासामर्थ्यादिति मुख्यबलीयस्त्वम् । यत्तु व्याकुलत्वादिति, तत्रोच्यते—स्याद्व्याकुलत्वम्, यदि कर्मविषयो भेदप्रतिपादनपराः स्युः; ते तु सिद्धं भेदमुपाश्रित्य 'इदमनेनेत्थं साधयेत्' इति पुरुषहितानुशासनप्रधानाः। स्यादेतत्; असति भेदेऽशत्रयप्रत्यस्तमयात् कुतो हितानुशासनम्? उच्यते— यथा खलु श्येनादिषु "[6]न हिंस्यात् सर्वा भूतानि" इति प्रतिषेधात् साध्यांशप्रत्यस्तमयेऽप्यनुशासनम्, एवं सर्वत्र सर्वांशप्रत्यस्तमयेऽपि; तथा हि—निषिद्धानर्थोदया कथं [7]हिंसा साध्या स्यात्? अथ भवति कस्यचित् तीव्रक्रोधाक्रान्तस्वान्ततया समुद्भूतध्वान्ततिरस्कृतविवेकविज्ञानस्यानर्थमप्यर्थत्वेन पश्यतः शास्त्रोपदेशमतिक्रामतः, तथा ज्योतिष्टोमादिषु निसर्गजाविद्योपप्रदर्शिता अप्रतिबुद्धानां त्रयोऽप्यंशाः, तानुपाश्रित्य तेषामनुशासनम् । प्रतिबुद्धास्तु कर्मविधिभिर्नानुशिष्यन्ते; यथा श्येनादिविधिभि[8]रपजितक्रोधारातयः । तदेवं व्यवहारसिद्धभेदा[9]श्रयेषु कर्मविधिषु यद्यपि भेद-

[1] यदाह—B.
[2] C omits न.
[3] नां चैकवाक्यताभावात्—C.
[4] Tantra-Vārtika, page 819, reads पौर्वापर्य.
[5] प्रतीयते—A.
[6] . . . .
[7] हि सा—B and C.
[8] रवजित—A.
[9] श्रयिषु—A.

प्रतीतिरस्ति, तथापि तेषामतत्परत्वान्न तत्र प्रामाण्यं वृत्तान्तेष्विवा[1]र्थवादपदानाम्। तथा च कुतस्तैर्वेदान्तानां पराहतिः, वेदान्तैर्वा तेषाम्? अपि च प्रत्यक्षादिष्वेव पराहतिरुप[2]लभ्यते, बाध्यबाधकभावदर्शनाद्रजतशुक्तिशकलादिज्ञानेषु; भेदाभेदप्रतीतिश्च सर्वत्र। तदेवं बलवत्त्वेऽप्याम्नायस्य यो नाम मन्दधीर्लौकिकवचसां प्रत्यक्षादिविरोध उपचरितार्थत्वदर्शनाल्लोकवद्वेदेऽपि शब्दवृत्तमिति मन्यते, यो वा निरूढनिबिडतया भेददर्शनान्धकारस्य प्रत्यक्षादीनामेव बलवत्त्वं [3]मन्यते, लोकवचसां च तैर्बाधदर्शनात्, तत्प्रतिबोधनाय विरोधो निरस्यते; न हि यो नाम मन्दविषेण वृश्चिकेन दष्टो म्रियते, नासौ न चिकित्स्यत इति।

तत्र प्रत्यक्षे त्रयः कल्पाः—वस्तुस्वरूपविधिः, वस्त्वन्तरस्य[4] व्यवच्छेदः, उभयं [5]वेति; उभयस्मिन्नपि त्रैविध्यम्—यौगपद्यम्, व्यवच्छेदपूर्वको विधिः, विधिपूर्वको व्यवच्छेद इति। तत्र वस्त्वन्तरव्यवच्छेदे उभयस्मिन् वा भेदः प्रत्यक्षगोचर इति भवति विरोधः। स्वरूपविधिमात्रे तु कस्यचिद्व्यवच्छेदेन शून्ये न भेदः प्रमाणार्थः; न हि व्यवच्छेदादृते भेदसिद्धिः। विधिमात्रव्यापारं च प्रत्यक्षम्; अतो न विरोधः। कथमित्युच्यते—

> लब्धरूपे क्वचित् किंचित् तादृगेव निषिध्यते।
> विधानमन्तरेणातो न निषेधस्य संभवः॥ २॥

न तावद्व्यवच्छेदमात्रं प्रत्यक्षव्यापारः, न युगपदुभयम्, न व्यवच्छेद[6]पूर्वकं विधानम्; यतः सिद्धे विषये सिद्धरूपमेव निषिध्यते—'नेदमिह' 'नायमयम्' इति सिद्धे भूतले सिद्धो घटः, गवि वा अश्वः। न प्रतिषेध्यात् प्रतिषेधविषयाच्च विना प्रतिषेधोऽवकल्पते। कथं तर्ह्यत्यन्तासतां प्रधानखपुष्पादीनां प्रतिषेधः? न हि [7]तत्र क्वचिद्देशे काले वा निषेधः, आत्यन्तिकत्वात्; नापि कुतश्चित् सिद्धिः, अत्यन्तासत्त्वात्। [8]तत्र केचिदाहुः—खपुष्पादिषु तावत् सिद्धेषु खादिषु तद्विधाः पुष्पादयो निषिध्यन्ते; 'प्रधानं नास्ति' इति जगत्कारणे सुखदुःखमोहात्मताविभक्तकार्यत्वादीनि [9]निवार्यन्ते।

---

[1] र्थवादानाम्—A.
[2] लक्ष्यते—A.
[3] मनुते—A and B.
[4] B omits स्य.
[5] चेति—A.
[6] पूर्वं—A.
[7] B and C omit तत्र
[8] अत्र—A.
[9] न वार्यन्ते—C.

अन्ये तु—कुतश्चिन्निमित्ताद्बुद्धौ लब्धरूपाणां बहिर्निषेधः क्रियत इति वर्णयन्ति; अन्यथा दैवनिषिद्धे कः प्रतिषेधोऽप्राप्तरूपे? [1]प्राप्तरूपे वा कथमत्यन्ताय प्रतिषेधः? अपि च अनपेक्षितविषयनिषेध्ये व्यवच्छेदे शून्यता प्रमाणार्थः स्यात्, न भेदः; सर्वस्य सर्वत्राविशेषेण निषेधात्। यस्तु भेदाय व्यवच्छेदः स भेद्ययोः सिद्धिमपेक्षते; न च सा विधाना[2]दृत इति प्राग्विधानमेषितव्यम्; विधिपूर्वक एव [3]च निषेधोऽङ्गीक्रियत इति।

नापि विधिपूर्वको व्यवच्छेदः; यतः—

क्रमः संगच्छते युक्त्या नैकविज्ञानकर्मणोः।
न संनिहितजं तच्च तदन्यामर्शि जायते ॥ ३ ॥

न खल्वेकप्रमाणज्ञानव्यापारौ सन्तौ विधिव्यवच्छेदौ क्रमवन्तौ युज्येते, क्षणिकत्वात्; क्रमवतोर्हि व्यापारयोः पश्चात्तनो न तद्व्यापारः स्यात्, व्यवधानात्। अपि च जन्मैव बुद्धेर्व्यापारोऽर्थावग्रहरूपायाः; सा चेदर्थविधानरूपोदया, विधिरेवास्या व्यापारः, यौगपद्यस्य निषेधात्, उत्पन्नायाश्च[3] पुनरनुत्पत्तेः। अपि च संनिहितार्थालम्बनं प्रत्यक्षं नासंनिहितमर्थमवभासयितुमर्हति; न चानवभासमान[4]रूपं व्यवच्छेत्तुं पर्याप्नोति; अनवभासमाने हि तत्र व्यवच्छेद्ये व्यवच्छेदमात्रं स्यात्, न व्यवच्छेदः कस्यचित्; सर्वस्य वा स्यात्। तस्मान्नानवभासमाने व्यवच्छेद्ये [5]व्यवच्छेदः; न च संनिहितार्थावलम्बने प्रत्यक्षेऽसंनिहितावभासो युक्तः। कथमिदानीं बाधकं प्रत्यक्षम्? तत्र हि पूर्वार्थनिषेधपुरःसरोऽन्यविधिरेकज्ञानेऽभ्युपेयते, असंनिहितनिषेध्यावभासश्च; तस्मान्नैष नियमः, यतः पूर्वो निषेधः, एक[6]ज्ञानव्यापारे च क्रमः, [7]प्रत्यक्षेण [8]चासंनिहिता[9]र्थावभासः। नैतत् सारम्; तत्रापि पूर्वविज्ञानविहिते रजतादौ 'इदम्' इति च संनिहितार्थसामान्ये निषेधो विधिपूर्व एव; शुक्तिकाविधिस्तु विरोधिनिषेधपूर्व उच्यते; विधिपूर्वता च नियमेन निषेधस्योच्यते, न विधेर्निषेधपूर्वक[10]ता निषिध्यते; न च तत्रैक-

---

[1] अप्राप्तरूपे—B.
[2] दृतमिति—B.
[3] A omits च.
[4] A and B omit रूप.
[5] अन्यव्यवच्छेदः—A and B.
[6] विज्ञान—A.
[7] प्रत्यक्षे—A.
[8] B omits च.
[9] A omits अर्थ.
[10] A omits क.

ज्ञानस्य क्रमवद्व्यापारता, उभयरूपस्यो[1]त्पत्तेः ; पूर्वज्ञानप्रापितत्वाच्च विषयव्यवच्छेद्ययोर्नासंभवः ; पूर्वज्ञानावभासिते च व्यवच्छेद्ये व्यवच्छेदस्य वृत्तेर्नासंनिहितार्थावभासप्रसङ्गः, पूर्वापेक्षस्य तस्योत्पत्तेः ; पूर्वापेक्षयैव च तत् द्विरूपमुदेति ; अन्यथा एकरूपमेवोदीयात् । अपि च सर्वव्यवच्छेदानपाकुर्वतः को व्यवच्छेदोऽभिमतः, येन प्रत्यव[2]स्थीयेत? सिद्धः स लोक इति चेत्, अयं वा किं न लोकसिद्धः—'नाश्वो गौः, न गौरश्वः' इति?

यत्तु मतम्—एकविधिरेवान्यव्यवच्छेदः ; तथा हि—दर्शनं यथैव तदाकारतया तद्रूपं विदधाति, तथा तदेकाकारप्रतिनियमात् 'तदेव, नान्यत्' इत्यन्यद्व्यवच्छिनत्ति ; तत्सामर्थ्यप्रभावितौ च 'इदम्, नेदम्' इति विकल्पौ भावाभावव्यवहारं प्रवर्तयतः । न ह्येकाकारप्रतिनियता[3]दनन्यसंसर्गिणो ज्ञानादन्योऽन्यव्यवच्छेदः । [4]तत्रोच्यते—

विधानमेव नैकस्य व्यवच्छेदोऽन्यगोचरः ।
मा स्म भूदविशेषेण मा न भूदेकधीजुषाम् ॥ ४ ॥

नैकप्रतिनियमोऽन्याभावनिश्चयनिमित्तम्, उपलब्धिलक्षणप्राप्तस्येतरस्य[5] चाविशेषेण व्यवच्छेदप्रसङ्गात्; तत्प्रतिनियमो हि ततोऽन्यस्यासंसर्गः । तथा चासंस[6]र्गाद्व्यवच्छेदे तस्य दृश्यादृश्ययोरविशेषादुभयोर्व्यवच्छेदः स्यात् । अथ मतम्—भवत्येव ; तथा हि—यावन्तोऽस्यानात्मानस्तानविशेषेण तदात्मनियमाद्दर्शनमपाकरोति ; तथा च नास्यान्य आत्मानः; तद्देशकालास्तु भवेयुः, रूपादिवदविरोधात् ; तत्रोपलब्धिलक्षण[7]प्राप्तिर्विशेषस्तद्देशकालव्यवच्छेदावधारणाय ; संभवति ह्यनुपलभ्यस्तद्देशकालोऽनात्मानुपलभ्यमानोऽप्यन्योपलब्धौ, रूपोपलब्धाविव रसः ; न [8]तु तुल्योपलम्भयोग्यतः, नियमेनोपलम्भात्, इतरवत् ; अन्यथा न तुल्योपलम्भयोग्यतः स्यात् । सत्यमस्त्ययं विभागः, न त्विदानीं दर्शनप्रतिनियमस्य सामर्थ्यम् ; तथा हि—प्रतिनियतमपि तत्र [9]देशे काले च रूपे दर्शनं तयोर्यथा[10] रूपविधिमात्रो-

---

[1] स्यैवोत्पत्तेः—A.
[2] स्थीयते—A.
[3] दन्यासं—C.
[4] Śaṅkhapāṇi and Citsukha read अत्र in their commentaries.
[5] स्याशेषेण—B.
[6] सर्गाद्व्यवच्छेदे—B.
[7] प्राप्तिविशेष—B.
[8] B and C omit तु.
[9] काले देशे—A.
[10] A omits यथा.

पक्षयान्न रसं व्यवच्छिनत्ति, तथा भूभागदर्शननियमोऽपि [1]भूभागविधिमात्रव्यापारत्वान्न घटदृश्यमपि व्यवच्छिन्द्यात्; व्यवच्छेदे वा सर्वस्य[2] व्यवच्छेदः। तस्मात् दृश्यव्यवच्छेदेऽपि हेत्वन्तरमुपास्यम्, न दर्शनप्रतिनियममात्रम्। [3]तथा चात्मान्तरव्यवच्छेदोऽपि न ततः सिद्धिमुपाश्नुते। कामं विधेर्विधेयासत्त्वव्यवच्छेदरूपत्वात् तदभावो व्यवच्छिद्येत; नात्मान्तरसत्ता, तद्देशकालयोरिवानुपलभ्यसत्ता। नैकस्य बहव आत्मान इति चेत्, अन्यतस्तर्हि विरोधाद्व्यवच्छेदः; न दर्शननियमात्। असति च व्यवच्छेदे कुतो बहुत्वम्, कुतो वा विरोधः? इतरेतराश्रयं वा; तस्मान्नैकविधिरन्यव्यवच्छेदः। अपि च एकनियमादन्यव्यवच्छेदे चित्रादिषु नीलादीनामेकदर्शनभाजां भेदो न सिध्येत्, एकज्ञानसंसर्गादेकत्र ज्ञानस्यानियमात्।

ननु प्रकृत्यैव भिन्ना भावाः; तांस्तद्विधान् विदधदेव दर्शनं परस्परतो व्यावर्तयति; न हि व्यावृत्तिरन्या व्यावृत्तिमतः; तत्र व्यावृत्तिमद्विधौ [4]सापि विधीयत एव; यत्प्रकृतिः खलु यः पदार्थः स तयैव प्रकृत्या विधेयः; अन्यथा न तस्य विधिः स्यात्; व्यावृत्तस्वभावाश्च भावा यथायथं दर्शनेषु निर्भासन्ते; तस्मात् तथैव विधीयन्त इति। अत्राप्यसं[5]स्पृष्टनिर्भासनादसंस्पृष्टस्वभावत्वे दृश्यादृश्ययोरविशेषेण व्यवच्छेदस्तदवस्थः। अपि च

न भेदो वस्तुनो रूपं तदभावप्रसङ्गतः।
अरूपेण च भिन्नत्वं वस्तुनो नावकल्पते ॥ ५ ॥

न व्यावृत्तिर्वस्तुस्वभावः; सा खल्वेकानेकाधिष्ठाना [6]प्रतिज्ञायते प्रज्ञायते च। तथा च तस्या [7]एकस्या अनेकवृत्तेर्वस्तुस्वभावत्वे वस्तूनामपि भेदो न स्यात्; नैकस्मादभिन्नमभिन्नस्वभावं भिन्नं युज्यते तद्वदेव। अथ मा भूदेष दोष इत्यर्थान्तरमेव व्यावृत्तिरा[8]श्रीयते, तथापि व्यावृत्तेररूपत्वात् स्वरूपेण न भावा व्यावृत्ताः स्युः। अपरः कल्पः—भेदः परस्परानात्मस्वभावः; स चेद्वस्तुनः स्वभावः वस्तूनामभावप्रसङ्गः, [9]अभावात्मकत्वप्रतिज्ञानात्। अपरः

---

[1] B omits भू.
[2] B omits स्य.
[3] तथापि चा—A and C.
[4] A omits अपि; B omits सापि.
[5] स्पृष्ट—A and C.
[6] B omits प्रतिज्ञायते.
[7] B omits—एकस्याः.
[8] श्रीयते—A.
[9] अभावात्मकत्वज्ञानात्—B; अभावात्मनोऽप्रतिज्ञानात्—C.

प्रकारः—भेदश्चेद्वस्तुनः स्वभावः, नैकं किंचन वस्तु स्यात्, भेदेनैकत्वस्य विरोधात्। परमाणुरपि भेदादनेकात्मक इति नैकः। तथा च तत्समुच्चय-रूपोऽनेकोऽप्यस्यात्मा नावकल्पते; तत्रैकत्वानेकत्वयोरनुपपत्तेस्तृतीयप्रकारासंभवाच्च वस्तुनो निःस्वभावत्वप्रसङ्गः। अन्या व्याख्या द्वितीयार्धस्य—व्यतिरेकाव्यतिरेकविकल्पे प्रत्यवतिष्ठते; वस्तुगत एष विभागः—तत्स्वभावत्वमन्यत्वं [1]चेति, नावस्तुनि विकल्पविरचितशरीरे भेदेऽवतारमर्हति। तथा हि—तत्त्वान्यत्वाभ्यामनिर्वचनीयोऽनादिविकल्पवासनोपादानविकल्प[2]परिदर्शितशरीरः 'अयमस्माद्भिन्नः, अयमनयोर्भेदः' इति व्यवहारं [3]प्रवर्तयति; न भेदो नाम किंचिद्वस्तु, यस्य तत्त्वमन्यत्वं वा [4]किंचि[5]द्विचार्येत। तत्रेदं पुनरुपतिष्ठते—अरूपेण च भिन्नत्वं वस्तुनो नावकल्पते। यदि तर्ह्यरूपो निःस्वभावो भेदः—न हि वस्तुस्थित्यास्ति, विकल्पैरेव केवलमुपदर्श्यते—[6]न तर्हि वस्तुनो भिन्नत्वम्, परमार्थतो भेदाभावात्; न हि कल्पितेन स्वभावेन पारमार्थिकी तद्वत्ता युज्यते; कल्पितैव स्यात्। तदेतदस्माभिरुच्यमानं किमिति भवान्ना[7]नुमन्यते? वयमप्येतदेव ब्रूमः—न भेदो भावतोऽस्ति, अनाद्यविद्याविलसितमेतदिति।

यदुक्तम्—भेदात्मत्वे वस्तुन एकवस्त्वभावः; तदभावादितरस्यापीति वस्त्वभावः; तत्राहुः—परापेक्षं वस्तुनो [8]भेदस्वभावं ब्रूमः, नात्मापेक्षम्, येन विरोधादेकवस्त्वभावः स्यात्; स्वरूपेण त्वेकं वस्तु परापेक्षया[9] भिन्नमिति। तत्रोच्यते—

पौरुषेयीमपेक्षां च न हि वस्त्वनुवर्तते ॥ ५½ ॥

नापेक्षा नाम कश्चिद्वस्तुधर्मः, येन वस्तूनि व्यवस्थाप्येरन्; न खलु स्वहेतुप्रापितोदयेषु [10]स्वभावव्यवस्थितेषु वस्तुषु स्वभावस्थितये वस्त्वन्तरापेक्षा युज्यते। तत्र पुरुषप्रत्ययधर्मोऽयम्। न च पुरुषप्रत्ययानुविधायीनि वस्तूनि, स्वहेतुभ्यः [10]स्वस्वभावव्यवस्थितेः। अतो न तदनुसारेण वस्तुरूपं व्यवतिष्ठते। व्यवस्थितवस्तुस्व[11]रूपानुसारेणैव तस्य व्यवस्था न्याय्या, तत्पूर्वकत्वात्। परस्परापेक्षायां च

---

1 वेति—A.
2 विरचितशरीरः—A and B.
3 B and C omit प्र.
4 A omits किंचित्.
5 विचार्यते—B and C.
6 B omits न.
7 भिमन्यते—C.
8 भेदं—A.
9 A adds च.
10 A and B omit स्व.
11 C omits स्व.

वस्तुस्वभावस्थितावितरेतराश्रयप्रसङ्गात् । अथवा यदुक्तम्—एकस्माद्भेदादव्यतिरेकाद्वस्तुनो भेदाभावप्रसङ्ग इति, तत्राहुः—न भेद एकः, रूपविरोधात्; एकत्वे च तन्निमित्तं वस्तूनामेकत्वं स्यात्; तस्मात् प्रतिभावं भेदो भिद्यते; कथं तर्ह्यनेकाश्रयत्वम्? अपेक्षातः; तथा हि प्रतियोग्यपेक्षं तस्य [1]स्वरूपं व्यवस्थितम्; तथा च यथा[2]यथं भेदैः प्रतियोग्यपेक्षैरात्मभूतैर्भिन्नाः सर्वे भावा इति । तत्रोच्यते—पौरुषेयीमिति । पुरुषो ह्येकमर्थं गृहीत्वा परमपेक्षते कार्यार्थम्; स्वहेतुभ्यस्तु प्रतिलब्धाविकलस्वभावानां भावानां भावान्तरेषु किमर्थापेक्षा? ननु स्वभावस्थितये; नानाविधा हि भावस्वभावाः; तत्र कश्चित् प्रतियोग्यपेक्षयैव व्यवतिष्ठते [3]वस्तुतत्त्वे; यथायमेव भेदः । न तर्हि हेतुभ्यो भावस्याविकलात्मलाभः, भेदाख्यस्य रूपस्य प्रतियोग्यपेक्षत्वात् । हेत्वन्तराच्च प्रतियोगिनः संपद्यमानः पश्चाद्भेदो न स्वभावः स्यात् ।

स्यादेतत्—अवि[4]कलरूप एव भावो हेतुभ्यो जायते । तत्र भेदाख्यं रूपं प्रतियोग्यपेक्षम्, नानपेक्षं कदाचिदिति तस्य तद्विधत्वात् तेन तद्विधेनैव सह जायत इति न विकलरूपप्रादुर्भावः । तत्रोच्यते—भवतु तद्विधस्य प्रादुर्भावः; अपेक्षार्थस्तु वक्तव्यः; यस्य हि यत्र किंचिदायतते, तत् तदपेक्षत इत्युच्यते; नान्यो [5]विशेषः सापेक्षनिरपे[6]क्षयोर्व्यपस्थापको निरूप्यते । तत्र न तावदुत्पत्तिः प्रतियोगिन्यायतते, स्वहेतुभ्योऽविकलस्योत्पत्तेः; नार्थक्रिया, तदसंनिधानेऽपि तस्यार्थक्रियादर्शनात् । प्रतीतिश्चेत्—तथा हि, नानपेक्ष्य प्रतियोगिनं भेदः प्रतीयत इति—न तर्हि भेदस्वभावः सापेक्षः; तस्मिन्नवस्थिते वस्तुस्थित्युत्तरकाला प्रतीतिरर्थान्तरमेव प्रतियोगिनमपेक्षते; यथा व्यवस्थितानपेक्षस्वभावा रूपादयश्चक्षुराद्यपेक्षायां प्रतीतौ न सापेक्षस्वभावाः कथ्यन्ते । इतरेतराश्रयाच्च न प्रतीतिरपि परस्परायत्तावकल्पते । न च वस्तुमात्रादनवगृहीतभेदाद्भेदसिद्धिः, एकस्मिन्नपि तत्प्रसङ्गात् । तस्मात् [7]पौरुषेयीमपेक्षां न वस्त्वनुवर्तते; [8]अतो न वस्तुस्वभाव इत्यर्थः ।

---

[1] C omits स्व.
[2] B omits यथं.
[3] C omits वस्तु.
[4] कल्परूप—B.
[5] हेतुः—A and B.
[6] क्षत्वयोः—A.
[7] पौरुषेय्यपेक्षा—C; पौरुषेय्यपेक्षां—B.
[8] तां—A.

अन्या व्याख्या—न भेदो वस्तुनो रूपम्; आपेक्षिको हि स प्रतीयते। न चापेक्षां पुरुषप्रत्ययं वस्त्वनुवर्तते, व्यवस्थितवस्तुपूर्वकत्वादिति।

कथं तर्हि [1]पित्रादयः? न हि तेऽपेक्षया विना; न च खपुष्पगन्धर्वनगरादितुल्याः, अविसंवादिव्यवहाराङ्गतया लो[2]कसिद्धत्वात्। उच्यते—भेदोऽप्येवं किं न लोकसिद्धः?

अपि च

पित्रादिविषयेऽपेक्षा जननादिप्रभाविता ॥ ६ ॥
एकक्रियाविशेषेण व्यपेक्षा ह्रस्वदीर्घयोः । ६½ ॥

व्यवस्थिते [3]एव जन्यजनकशक्ती पितृपुत्रशब्दयोरभिधेये; ते तु समानजननव्यापारविषये तावास्कन्दतः, स्वभावभेदात्। अतो येन समानत्वम्, तत्रापेक्षा। एतदुक्तं भवति—शब्दार्थस्तत्र सापेक्षः, न वस्तु; अपेक्षाहेतुश्च तत्र साधारणी क्रिया विद्यते व्यवस्थितयोरपि वस्तुनोः। भावभेदे स्वयं वस्तुतत्त्वगतो विचारः; न चापेक्षाहेतुः कश्चिदुपलभ्यते। ह्रस्वदीर्घयोरप्येकजातीयायां क्रियायां देशव्याप्तौ न्यूनाधिकभावा[4]देवं द्रष्टव्यम्।

यदि तर्हि कार्यभेदादप्यपेक्षा; हन्त! अर्थक्रियाभेदादेव भावानां [5]परस्परापेक्षो भेदः सेत्स्यति। किंच असत्यामपि दर्शनाद्भेदसिद्धौ विधिमात्रव्यापारत्वात् कार्यभेदादेव कारणभेदमनुमिमीमहे; नैकत्वे कार्यभेदः कल्पते, कारणस्वभावापेक्षत्वात् कार्यभेदस्य। [6]तज्जननं चेदस्य स्वभावः, नान्यजननः; तस्मात् कार्यान्तरस्यान्यतो जन्मेति। तदिदं [7]भेदेनैव भेदप्रसाधनं नातिचतुरश्रम्। अपि च

अर्थक्रियाकृते भेदे रूपभेदो न लभ्यते ॥ ७ ॥
दाहपाकविभागेन कृशानुर्न हि भेदवान् ॥ ७½ ॥

नार्थक्रियाभेदाद्भावानां परस्परापेक्षो रूपभेदः प्रतीयते; नाप्यनुमातुं शक्यते; व्यपदेश[8]भेदमात्रं तु स्यात्, एकस्मिन्नपि वह्नौ दाहपाकादिकार्यभेददृष्टेः। अथ मतम्—रूपादिसमूहो वह्निः; तत्र रूपात् प्रकाशः, स्पर्शाद्दाह इति।

---

[1] पितृत्वादयः—A.
[2] के—B.
[3] एव हि—A.
[4] देव—C.
[5] परापेक्षो—B.
[6] तज्जननं—A.
[7] भेदेनोद्भेदः प्रसाधनं—B.
[8] B omits—भेद.

कामम्, दाहपाकौ तु स्पर्शादेव; तौ च [1]लोके प्रतीतभेदौ सत्यपि संयोगिद्रव्यविक्रियासामान्ये; कर्म चैकं संयोगविभागसंस्काराणां हेतुः, आत्मा चेच्छादीनाम्, सत्त्वादयश्च प्रत्येकमभेदाल्लाघवप्रकाशादीनाम्, रूपादयो ज्ञानविशेषाणां सजातीयक्षणानां [2]चेत्युत्प्रेक्षितव्यम्। ननु नार्थक्रियाभेदमात्राद्भेदं ब्रूमः, अपि तु तत्रासंभाविन्या अदृष्टायाः; यथा चक्षुषि सत्यप्यदृष्टायाश्च[3] बधिरे तत्रासंभाविन्याः शब्दबुद्धेरिन्द्रियभेदः; परस्परासंभविकार्याश्च प्रायेण भावाः, अन्यकार्यस्यान्यत्रादर्शनात्; अथ कार्यासंभवः कथं प्रत्येतव्यः? ननूक्तं तत्रादर्शनात्; न तर्ह्यसंभवः; यस्य खल्वद्वयं जगत् तस्य कार्यजातमेकत्रैव दृश्यत इति कथमदर्शनम्? तत्र सिद्धे भेदे तत्रादर्शनम्, तत्रादर्शनाच्च[4] भेदसिद्धिरितीतरेतराश्रयान्न भेदानुमानम्। अथ मतम्—अदृष्टस्य दर्शनादिति; तदसत्, [5]एकस्मादपि क्रमवतां कार्याणां दर्शनात्। स्यादेतत्—एकान्ततोऽभेदे कार्यदर्शनादर्शने न युक्ते, विशेषाभावात्। न तर्हि कार्यभेदोऽभेदम[6]पबाधते; तदनुपमर्देन विशेषमात्रानुमानं स्यात्; तच्च कल्पनाविषयं नैवावजानीमहे, वस्तुसतस्तस्यायोगात्, तत्त्वान्यत्वयोरसंभवात्। यस्तु क्षणिकवादी तत्त्वमेव विशेषस्य [7]न मन्यते, तस्यासति कारणस्वभावाभेदे कथं तुल्यस्वभावकार्योत्पादः? अथ निरन्वयविनाशानामपि कल्पनाविषयादभेदात् कार्यस्य तुल्यता; हन्त! [8]तर्हि भेदादेव कल्पनाविषयात् कार्यभेदसिद्धेर्मुधा कारणभेदकल्पना। अथ न कार्याभेदेन कारणस्वभावाभेदोऽ[9]पेक्ष्येत, भिन्नस्वभावेभ्यः [10]सहकारिभ्य एककार्योत्पत्तेः यथा चक्षुरादिभ्यो [11]रूपादिज्ञानस्य; यथा तर्हि कार्यस्वभावाभेदाय न कारणस्वभावाभेदोऽपेक्ष्यते, तथा तद्भेदाय कारणभेदोऽ[12]पि नापेक्षितव्यः। अपि च अनेककारणजन्येऽप्येकस्मिन् कार्ये कारणव्यापारविषयभेदस्तेनैव वर्णितः, यथा रूपज्ञानस्य—चक्षुषो रूपग्रहणनियमः, समनन्तरज्ञानादुपलम्भात्मता, विषयात्तदाकारतेति। यदि च कार्यतुल्यत्वं न हेतुसाम्यकृतम्, न कार्याद्धेत्वनुमानं स्यात्, भिन्नजातीयादपि तुल्यजातीयोत्पत्तिसंभवात्। हेत्वभेदश्चेन्न

[1] लोक—B.
[2] चेत्याद्युत्प्रेक्षितव्यम्—A.
[3] B omits श्च.
[4] A omits च.
[5] एकस्यापि—C.
[6] व—A and C.
[7] A and C omit न.
[8] A omits तर्हि.
[9] अपेक्ष्यते—A and B.
[10] B omits सहकारिभ्यः.
[11] रूपज्ञानस्य—A and C.
[12] B omits अपि.

कार्यभेद उपयुज्यते, कस्तुल्यजातीयाद्विजातीयस्य जन्म निवारयेत्? तत्र यथा व्यावहारिकादभेदात् कार्यभेदः, तथा व्यावहारिकाद्भेदात् कार्यभेद इति न विशेषः। स्यादेतत्—कल्पितश्चेद्भेदः कार्यभेदाय प्रभुः, न तर्हि कल्पितः; न ह्यन्यत् परमार्थसतो लक्षणमर्थक्रियासामर्थ्यात्; तुल्यमिदमभेदेऽपि।

योऽ[1]पि मन्यते—युगपद्विरुद्धार्थक्रियादर्शनाद्भेदावगतिः; तथा हि—जननमरणवृद्धिक्षयस्थानगमनशोकहर्षादिविविधविरुद्धधर्मसमुपेतमेकदा विश्वमुपलभ्यते; तद्भेदवदिति गम्यते; तस्यापीदमेवोत्तर[2]मावृत्त्या—दाहपाकविभागेनेति। कथम्? इदं तावदयं प्रष्टव्यः—को विरोधार्थः? यद्येकत्रासंभवः, सोऽसिद्धः। अथ परस्परव्यवच्छिन्नात्मता, जननादयश्च [3]परस्पररूपनिवृत्त्यात्मान इति; न तर्ह्यतो भेदसिद्धिः, एकस्मिन्नपि वह्नौ दग्धृत्वपक्तृत्वदर्शनात्; न हि परस्परव्यवच्छेदमन्तरेण नानात्वं धर्माणाम्; ततश्चेद्भेदः, नानेकधर्मकमेकं[4] किंचित् स्यात्। अथ परस्पराभावात्मतैव विरोधः—नैकस्मिन् स एव भवति, न च भवतीति; ततो भेदावसायः; तदसत्; न ह्येवं धर्मावेव; कुतस्तयोर्विरोधाद्भे[5]दावगतिः? खपुष्पादिषु [6]चोभयाभावादुभयप्रसङ्गः। अथ [7]वध्यघातुकभावो विरोधः—हर्षः शोकं हन्ति, शोकश्च तम्; एवमितरेष्वपि; तत्रापि नाजात एकोऽन्यं नाशयति, नान्याधिकरणम्; तस्मादेकाधिकरणो भूत्वा नाशयतीति वाच्यम्; एवं च तयोरेकाधिकरणत्वदर्शनान्न तद्दर्शनेनाधिकरणभेदानुमानमव्यभिचारम्। अथ भावरूपतद्व्यवच्छेदात्मानो धर्मा विरोधिनः—नित्यत्वानित्यत्वमूर्तत्वामूर्तत्वादयः; तत्संबन्धाद्भेदगतिः; तदपि न; यतो नावश्यम्, यो यत्र भवति, स तं व्याप्नोति; न हि रथादयस्तत्सं[8]योगादयो वा नभो व्यश्नुवते, अन्यान्वा संयोगिनः पृथिव्यादीन्, अवच्छिन्नत्वात्। एवमव-

---

[1] A and C omit अपि.

[2] रं सामर्थ्यावृत्त्या—B

[3] परस्परानात्मात्मानः—B.

[4] A omits एकं.

[5] द्भेदगतिः—A.

[6] B omits च.

[7] बाध्यबाधकभाव—B.

[8] संयोगा वा—A and B.

च्छिन्ना धर्मा अनवच्छिन्नमनन्तमर्थमाश्रयन्तोऽपि न व्यश्नुवते; अतो नैकस्मिन्नपि भावाभावविरोधः ।

यस्तु मन्यते—अर्थक्रियाभेदोऽर्थक्रियाव्यवस्था; ततो भेदाधिगमः; एकत्वे हि न व्यवस्था युज्यते; तथा च पयसोऽपि तैलं तिलेभ्यश्च दधि स्यात्; तथैकस्मिन् जायमाने सर्वं जायेत, नश्यति च नश्येत्; अन्यथा भेद एव शब्दान्तरेणोक्तः स्यात्; तदुक्तम्—"[1]सहोत्पत्तिविनाशौ सर्वं च सर्वत्रोपयुज्येत" इति; तस्यापीदमेवोत्तरम्—दाहपाकविभागेनेति । यदि कार्यनानात्वं व्यवस्था, न[2] तथा तिलानां पयसश्च[3] भेदं प्रतिपद्यते । अथ पयसो दध्नो जन्म, नान्यत इति व्यवस्था; नान्यत्वं सिद्धया व्यवस्थया प्रमित्सितं तल्लक्षणमनुप्रवेष्टुमर्हति, तस्या असिद्धिप्रसङ्गात् । तस्माद्दधिजननशक्तिस्तदभावश्च व्यवस्था; ततो भेदः; न ह्येकविषये एकस्य शक्त्यशक्ती युज्येते इति—स चायं विरोधिधर्मयोगो भेदहेतुरनन्तरमेव निरासि; यथा खलु दीर्घकालाः पदार्था मितकालैर्धर्मैः संबध्यमानास्तद्धर्मिणोऽतद्धर्मिणश्च न विरोधपदभाजः, तथा परिमितदेशैर्विपुलदेशा अनन्ताश्च । कथमनन्तस्यान्तवान् धर्म इति चेत्, व्यतिरेकेऽनिर्वचनीयत्वे वा नास्त्यसंभावनावकाशः; अव्यतिरेकेऽपि दीर्घकालस्येव मितकालः । योऽपि दीर्घकालमर्थं न प्रतिपद्यते तं प्रतीदं पुनः पठितव्यम्—दाहपाकविभागेनेति । एकोऽपि वह्निः किंचिदेव दहति पचति च; तथा च दाहकश्चादाहकश्च न भिद्यते; तथा न दाहान्तराणि पाकान्तराणि वा करोति तस्मिन्नेव दाह्ये पाक्ये च; [4]तथा बीजादयः प्रत्येकं समर्था अपि नाङ्कुरान्तराणि जनयन्ति, नापि सामग्री; तथा च जनकत्वमजनकत्वमिति । अथैकस्मिन्नेव जनकशक्तिः, अन्यं प्रध्वस्तमागामिनं [5]वैकं किं न जनयति? अथ तत्रैवैषां सामर्थ्यम्, नान्यत्र तुल्यजातीयेऽपि; कुतः? तस्यैवोत्पत्तेः, कार्यगम्यत्वाच्च सामर्थ्यस्य; तथा च न शक्तिरशक्तिश्चेति विरोधः । अभेदेऽपि तर्हि पयसस्तिलानां दध्नोऽनुत्पत्तौ न विरोधः; तथा हि—यस्य तावद्दध्नः पयसो जन्म न तस्य तिलेभ्योऽनुत्पत्तिः, येन शक्त्यशक्ति-

---

1 ....
2 A omits न.
3 B omits च.
4 तथापि—B.
5 चैकं—C.

विरोधाद्भेदः स्यात्; कुतः? तिलानां पयसोऽभेदात्। अथ दध्यन्तरस्यानुत्पत्तेर्विरोधः; तच्च न, अन्यत्राशक्तेस्तत्रैव शक्तेर्बीजादीनामिव; न हि समर्थमित्येव कारणं सर्वं तुल्यजातीयं जनयति, एकस्मादेव सर्वतुल्यजातीयकार्योत्पत्तिप्रसङ्गात्। अथ मतम्—अर्थक्रियासु भेदेन विनियोगाद्भेदमध्यवस्यामः; [1]दध्नि हि पयो विनियुज्यते, न सिकतेति; तदप्यनैकान्तिकम्, एकत्वेऽपि भेदेन [2]विनियोगदर्शनात्; तदेवार्थवस्तु सहकारि[3]समेतं विनियुज्यते, न केवलम्। अथ मतम्—भिन्नमेव तत्, सहकारिसंनिधानोपाधिभेदात्; औपाधिकस्तर्हि प्रत्ययमात्रनिवेशी भेदः, न [4]परमार्थतः; तथाभूतश्च भावभेदो ह्यनुज्ञायत एव। योऽपि क्षणिकत्वेन भेदमाह, तस्यापि भेदस्य तुल्यत्वात् सर्वं सर्वत्र [5]विनियुज्यते, न वा किंचित् क्वचित्; अदृष्टसामर्थ्यत्वात्। अथ कल्पनाविषयाद्भेदात् तत्सिद्धिः, परस्यापि तादृशाद्भेदादिति न विशेष इत्युक्तम्। योऽप्येकस्योभयं प्रतिजानीते—भेदमभेदं च, तेनैकत्रापि विरुद्धधर्मावेशमभ्युपयता दुर्लभ एव दध्नो जनकत्वाजनकत्वाभ्यां तिलपयसोर्विभाग इति।

तदेवम्—

एकस्यैवैष महिमा भेदसंपादनासहः ॥ ८ ॥
वह्नेरिव यदा भावभेदकल्पस्तदा मुधा ॥ ८½ ॥

एकत्र क्रियाभेदोपलब्धेः, असंभवस्य चासिद्धेः, अदृष्टदर्शनस्य चाभेदापबाधने सामर्थ्याभावात्, विशेषमात्रहेतुत्वात् तस्य च तत्त्वान्यत्वाभ्यामनिर्वाच्यस्य कल्पनास्पदत्वात्, अभेदादिव च तादृशात् कार्यभेदस्य भेदादपि तद्विधाद्भेदस्योपपत्तेः, विरोधस्य चानैकान्तिकत्वादसिद्धत्वाद्वा व्यवस्थायाश्च, विनियोगभेदस्य चानैकान्तिकत्वात्, अभेदादिव च कल्पिताद्भेदात्तत्सिद्धेः, भेदाभेदयोश्चैकत्र[6] समवाये शक्त्यशक्त्योर्विनियोगाविनियोगयोश्चैकसमवायसंभवात् एकस्यैवैष कोऽप्यचिन्त्यः[7] सामर्थ्यातिशयो निखिलभेदप्रपञ्चसंपादनार्थं प्रभुः पावकस्येव पाकक्लोषादिप्रविभागनिमित्तं यदोपपद्यते

---

[1] Śaṅkhapāṇi reads दध्नि in his commentary.

[2] A omits वि.

[3] समवेतं—B.

[4] परमार्थः—A.

[5] नियुज्यते—B.

[6] A omits त्र.

[7] चिन्त्यसा—B.

तदा भेदकल्पनमकारणम्, एकस्मादपि तत्सिद्धेः—इति पूर्वोपसंहारः। तदेतदृचाभ्यनू[1]क्तम्—"[2]एतावानस्य महिमा" इति; एतत्परिमाणमस्य सामर्थ्यम्—यदेकोऽपि "[3]सहस्रशीर्षा" इति "[4]यद्भूतं यच्च भव्यम्" इति। पूर्वर्ग्द्वयनिर्दिष्टविविधविरुद्धा[5]भिमतधर्मकार्यव्यवहाराश्रयः कथमिति? "[2]अतः" प्रत्यक्षाभिमतात्, "[4]पुरुष एवेदं सर्वम्" इति वाद्दृष्टनिर्दिष्टात्, "[4]उतामृतत्वस्य" इति वा देवमनुष्यलोकभेदेन प्रपञ्चादेकैकस्मात् समस्ताच्च वृद्धतरः पुरुषः; तेनास्मिन् परिमितानां विरुद्धाभिमतानामप्यनन्ते न समावेशो न युज्यते। तदेव ज्यायस्त्वं दर्शयति—"[2]पादोऽस्य विश्वा" इति; कृत्स्नोऽपि तावद्भूतप्रपञ्चोऽस्य कनीयान् भाग इति, किं पुनः प्रत्येकम्; तथा हि—"[2]त्रिपात्" इवा[6]परिमितमनन्तं मरणादिभूतप्रपञ्चधर्मशून्यं रूपं "[2]दिवि" प्रद्योतावस्थायां वर्तते, प्रमोदावस्थायां वा, सूर्यमण्डले, द्युस्थाने वा; तत्र हि तदुपास्यम्; तद्धि तस्योपलब्धिस्थानमिति तत्रेत्युच्यते।

अपरः कल्पः—कल्पितेऽपि कार्यभेदाद्व्यवस्थाया[7] वा कारणभेदे किमिति न कार्यान्तरम्? किमिति वा न संकरः, [8]विपरीता वा व्यव[9]स्था? भेदेऽपि पयसः, तिलेभ्य एव तैलं न सिकताभ्यः? भिन्ना अपि चैककार्याश्चक्षुरालोकादयः, शरशृङ्गादयश्च[10]; भेदेऽपि च तिलेभ्यस्तैलं पयसो दधि, न तु पयसस्तैलं तिलेभ्यो दधि? यदि मतम्—अचिन्त्येभ्यो भावसामर्थ्येभ्यः—अचिन्त्यान्युपपत्तितो भावसामर्थ्यानि 'कस्मात्? कथम्?' इति, कार्यदर्शनोन्नेयव्यवस्थानि—तेभ्यः कार्यस्य भेदः, व्यवस्था, न विपर्ययश्चेति; यद्येवम्, एकस्यैव सोऽस्तु सामर्थ्यातिशयः—यदनेकं व्यवस्थितमविपरीतं च कार्यम्; तन्मात्रेण तत्सिद्धेरप्रामाणिका भावानां भेदकल्पनेति।

स्यादेतत्—वह्नेरपि शक्तिभेदनिबन्धनः कार्यभेदः; तन्नैकस्मादनेकं

---

1 सूक्तम्—B.
2 Puruṣa-Sūkta 3.
3 Do. 1.
4 Do. 2.
5 B reads विरुद्धाविरुद्धा.
6 B reads परिमित.
7 व्यवस्थया—B.
8 B omits वि.
9 B omits व.
10 श्चापि—B.

कार्यम् । तत्र यदि वह्निरपि कारणम्, कथं नैकस्मादनेकं कार्यम्? अथ शक्तीनामेव कारणत्वमभिप्रैति; तत्रोच्यते—

यथैव भिन्नशक्तीनामभिन्नं रूपमाश्रयः ॥ ९ ॥
तथा नानाक्रियाहेतुरूपं किं नाभ्युपेयते? ॥ ९½ ॥

एकस्यानेककार्ययोगविरोधाच्छक्तिभेदः कल्प्यते । यदि चैकस्यानेकसंबन्धविरोधः, कथं नानाभूताभिः शक्तिभिरेकः संबध्यते? तत्र यथैकस्यार्थस्वभावस्य नानाशक्तियोगः, तथा नानाकार्ययोगोऽपि किं नानुज्ञायते? अथ नानाकार्ययोगे विरोधः, न नानाशक्तियोगे; विशेषहेतुर्वाच्यः । अपि च शक्तीनामव्यतिरेकादेकमनेकात्मकमिष्टम्; तत्रैकत्वं स्वाश्रयसमवायिनानेकत्वेन न विरुध्यते; कार्यगतेन स्वाश्रयान्तरसमवायिना विरुध्यत इति सुभाषितम्! अथार्थान्तरत्वमेव शक्तीनाम्, आश्रयार्थो वाच्यः; संश्लेषश्चेत्, न भिन्नत्वे रूपाविभागलक्षणः संश्लेषः[1]; भेद एव न स्यात्; न नैरन्तर्यम्, तच्छक्तिद्रव्यसंयुक्तस्य द्रव्यान्तरस्यापि तच्छक्तित्वप्रसङ्गात्; न हि द्रव्यस्यानन्तरं तच्छक्तेर्व्यवहितं भवति; न [2]हि चक्षुर्द्रव्यस्यानन्तरं रूपस्य नानन्तरम् । विभुत्वाच्चाकाशादीनां सर्वार्थशक्तिव्यवधानाभावात् सर्वशक्ति[3]त्वप्रसङ्गः । तस्मादुपकारविशेषात् कुतश्चिदाश्रयः; तत्र यथा भिन्नासु शक्तिषु तद्भेदादुपकारान् भिन्नानेकोऽर्थस्वभावः करोति, तथा कार्याण्यपीति कस्मान्नेष्यते? एवं तावन्नानुमानेनापि भेदाधिगमः, नार्थापत्त्या च[4] ।

ये तु मन्यन्ते—सत्यमेतत्, न प्रत्यक्षं भेदाधिगमायालम्; इतरेतराभावांशो हि भावानां भेदः, न सोऽक्षगोचरः; "[5]भावांशेनैव [6]संयोगो योग्यत्वादिन्द्रियस्य हि"; तथा च न लिङ्गगम्योऽपि, अदृष्टसंगतित्वात्; अर्थापत्तिरपि कार्यव्यवस्थाहेतुका स्यात्; सा असिद्धे भेदे [7]कार्यव्यवस्थाया एवानुपपत्तेस्तत्रायुक्ता । तस्मात् सदुपलम्भहेतुभ्यः प्रमाणान्तरमेवाभावायोपासनीयम्; विधायकाद्वा प्रमाणान्तरमेव व्यवच्छेदकमभावाख्यम्; तन्निबन्धना

---

1 षा—B.
2 C omits हि.
3 B omits त्व.
4 वा—A.
5 Śloka-Vārtika page 479.
6 संबन्धो—C.
7 C omits कार्य.

हि भावानामसंकीर्णस्वभावता; यदवोचन्—“[1]वस्त्वसंकरसिद्धिश्च तत्प्रामाण्य[2]समाश्रया” इति तान् प्रत्युच्यते—

अन्योन्यसंश्रयाद्भेदो न प्रमान्तरसाधनः ॥ १० ॥
नास्मि[3]न्नयं नादमयमिति भेदाद्विना न धीः ॥ १०½ ॥

न खलु यद्व्यवच्छिद्यते, यतश्च व्यवच्छिद्यते, तयोरप्रतिपत्तौ व्यवच्छेदगतिः; नानपेक्षितविषयनिषेध्यो निषेधोऽस्ति; सन् वा शून्यतामापादयेत्, न भेदमित्युक्तम्। तेषामपि वचः—

“[4]गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम्।
मानसं नास्तिताज्ञानं जायतेऽक्षानपेक्षया ॥”

तयोश्च प्रतिपत्तिर्यदि नासंकीर्णस्वभावयोः, अपि तु वस्तुमात्रत्वेन, व्यवच्छेद्यव्यवच्छेदावधिविभागाभावात्; न निषेधसंभवः अर्थमात्रे ह्यविभागे; विषयत्वेनापेक्षिते न निषेध्यम्; निषेध्यत्वेनापेक्षिते न विषयविशेषः; तत्रात्यन्ताय निषेधः स्यात्; स च न सिद्धत्वेनासिद्धत्वेन वा युज्यत इत्युक्तम्। कस्य चित् कुतश्चिच्च[5] भेदप्रतिपत्तौ सर्वस्य सर्वतो भेदगतिः स्यात्, [6]अविशेषात्। तस्मादनेनासंकीर्णस्वभावेन भिन्नावेव प्रतिपद्य विषयनिषेध्यौ ‘नेदमिह,’ ‘नायमयम्’ इति व्यवच्छेदः प्रतिपत्तव्यः, संभवात् नियमाच्च। न चान्यथा प्रतियोगित्वम्, सामान्योपलब्धौ [7]च स्थाणौ [8]पुरुषाभावप्रतिपत्त्यभावात्। तथा च सिद्धविषयनिषेध्याङ्गीकरणेन व्यवच्छेदमात्रविधायिन्यभावप्रतिपत्तिः प्रत्यात्ममुपलक्ष्यते। तथा च इतरेतराश्रयत्वम्—असंकरपूर्वमभावज्ञानम्, ततश्चासंकरसिद्धिरिति। अपि च न प्रमाणानुत्पादमात्रादभावज्ञानम्, सुषुप्तादावनुत्पत्तेः; तस्मात् सत्सु प्रमाणकारणेषु प्रमाणानुत्पादोऽभावज्ञानहेतुरिष्टः। न च तस्य स्वरूपभेदः कश्चित्, येन सामर्थ्यातिशयाच्चक्षुरादिवद्बोधकः, किं तु नान्तरीयकत्वात्; नान्तरेण प्रमेयाभावं सत्सु प्रमाणहेतुषु प्रमाणानुत्पादः; असत्सु तु सत्यपि प्रमेये तदभावात् स्यादिति। तथा च लिङ्गवत् ज्ञानापेक्षः प्रतिपत्तेर्जनकः; स च यदि वस्त्वन्तरज्ञानम्,

---

[1] Ślōka-Vārtika page 473.

[2] समाश्रयात्—C.

[3] न्निदं—A.

[4] Ślōka-Vārtika page 482.

[5] A omits च.

[6] C omits अविशेषात्.

[7] C omits च.

[8] पुरुषस्याभाव—A.

नासिद्धे वस्तुभेदे सिध्यति; ज्ञेयभेदानुमेयो हि ज्ञेयानुमेयानां ज्ञानानां भेदः। तथा च वस्तुभेदसिद्धिपूर्विकैवाभावा[1]द्भेदावगतिरितीतरेतराश्रयत्वम्। [2]अथात्मनोऽपरिणामः; न स स्तिमितावस्था, सर्वाप्रतिपत्तौ कस्यचिदभावस्यानवगतेः; तस्मात् सत्यपि वस्त्वन्तरज्ञानरूपपरिणामे तज्ज्ञानरूपपरिणामाभावोऽभावज्ञानहेतुः। न चैष विशेषः प्राग्वस्तुभेदसिद्धेः सिध्यतीति तदेवेतरेतराश्रयत्वम्।

ये त्वाहुः—दर्शनादेव भावानां भेदः सिध्य[3]ति; तथा हि—निर्विकल्पस्य प्रत्यक्षस्य सामान्यविषयत्वमपाकुर्वतोक्तम्—"[4]तद्युक्तं प्रतिद्रव्यं भिन्नरूपोपलम्भनात्" इति; यस्तु संयोगात् समवायाद्वा संकरः, सोऽभावाख्येन प्रमाणेनापनीयत इति; ते प्रागेव प्रत्युक्ताः।

येऽपि—विधायकप्रत्यक्षपुरःसरं प्रत्यक्षान्तरमेव वस्तुग्रहणप्रतियोगिस्मरणेतिकर्तव्यतानुगृहीताक्षप्रतिलब्धजन्म व्यवच्छेदकं मन्यन्ते; यथैव सविकल्पस्य वस्तुग्रहणस्य पश्चाज्जन्म, शब्दस्मरणव्यवधिश्च—न चानैन्द्रियकत्वम्, इतिकर्तव्यताविशेषानुगृहीतादिन्द्रियात् तदुत्पत्तेः—एवं नास्तीत्यपि ज्ञानस्येति ब्रुवन्तः; तान् प्रतीदमेव वक्तव्यम्—अन्योन्यसंश्रया द्भेदो न प्रमान्तरसाधनः। प्रत्यक्षान्तरसाधन इत्यर्थः; 'अयमसौ न भवति' इति ज्ञानं प्रत्यक्षं वा प्रमाणान्तरं वा; सर्वथा विषयनिषेध्यविभागादृते न निषेधसंभव इति।

किं च

मीयमानैकरूपेषु न निषेधोऽवकाशवान्॥ ११॥

अपि च सन्मात्ररूपे सर्वत्र [5]प्रतीयमाने तत्स्वभावेषु वस्तुषु नेतराभिमत इतराभिमतप्रमाणानुत्पादः, सत्स्वभावत्वात् तयोः; 'सत्' इति च सर्वत्र प्रमाणसद्भावात्; प्रमाणाभावाच्चेतरेतराभावज्ञानमिति। ननु नार्थानां किंचिदभिन्नं रूपम्; प्रत्यभिज्ञानाद्धि [6]तद्गम्येत; न चार्थमात्रं दृष्टवतोऽर्थान्तरे स एवायमिति प्रत्यभिज्ञास्ति, [7]यथा एकां गां दृष्टवतो गवान्तरे; सच्छब्दप्रत्ययानुवृत्तिस्तु पाचकादिवद्योगनिबन्धना; प्रमाणविषयो हि 'सन्'

---

[1] भेदगति—A.
[2] अथाप्यात्मनो—A.
[3] C adds इति.
[4] Śloka-Vārtika page 170.
[5] प्रमीयमाणे—A.
[6] तदवगम्येत—A.
[7] C omits यथा and दृष्टवतः.

इत्युच्यते । नैतत्सारम्; न चेदभिन्नरूपप्रतिपत्तिः, निर्विषयत्वमेव प्रमाणस्यापद्येत; यतो न व्यवच्छेदमन्तरेण भेदप्रतीतिः; [1]न व्यवच्छेदः केवलः, न विधिसहितः, न विधेः पश्चात् प्रमाणस्य व्यापारः; न विधिरेव व्यवच्छेद इति वर्णितम्; तत्र यद्येकमपि न गम्यते निर्विषयतैव स्यात् । अप्रत्यभिज्ञानं च यदि गोवैलक्षण्या[2]दुच्येत सत्यपि [3]सन्मात्ररूपानुगमे, गवान्तरेऽपि तत्र स्यात्, देवदत्तवैलक्षण्यात्; न हि यादृशो देवदत्तस्य पुनर्दर्शने [4]एकत्वप्रत्ययस्तादृशो गवान्तरे । अथास्ति तत्र तावत् पूर्वापरानुसंधानम्, न तु सतः सदन्तरे; किं च भोः! अनुसन्धानादेकत्वम्, नाभिन्न[5]रूपसंविदः; नेदानीमभिन्नदेशकालोऽर्थ एकः स्यात्; देशकालभेदे हि 'सोऽयम्' इति पूर्वापरानुसंधानम् । गोमण्डले च महिषमण्डलविलक्षणे देशभेदेऽप्यभिन्नरूपानुगतात् प्रथमादेव निर्विकल्पकात् प्रत्ययादेकार्थप्रतिपत्तिरिष्यते; न च तत्र कालभेदाभावात् 'सोऽयम्' इत्य[6]वमर्शः; यथोक्तम्—

"[7]निर्विकल्पकबो[8]धेऽपि द्व्यात्मकस्यापि वस्तुनः ।
ग्रहणं लक्षणाख्येयं ज्ञात्रा शुद्धं तु गृह्यते ॥"

न [9]च यथा मणिकं दृष्टवतो मणिकान्तरेऽनुसन्धिः तथा शरावं दृष्ट्वा; तत्र मृज्जातिरप्यपह्नूयेत । अथास्ति तत्रापि; न तु यथा मणिकान्तरे सामान्यरूपाणां भूयस्त्वादुत्कटः, अल्पसामान्यानुगमात्; सदन्तरेऽपि तथैव स्यात् । विस्तरेण चैतदुपरिष्टादभिधास्यत इत्यलमतिप्रसङ्गेन ।

भेदाभेदावभासे द्वे विज्ञाने चेत् परीक्ष्यताम् ॥ ११½ ॥

यदि मतम्—विद्येते तावद[10]नुवृत्तव्यावृत्ताभे द्वे विज्ञाने; न हि तयोरभावेऽनुवृत्तव्यावृत्तव्यवहार[11]संभवः; न च विज्ञानरूपादन्योऽर्थव्यवस्थाहेतुः; तस्याहेतुत्वेऽभेदोऽपि न सिध्येत् । नैतत् सारम्; न हि विज्ञानमित्येवार्थतत्त्वं व्यवस्थापयति; तदपि हि परीक्ष्यम्—युक्त्या विरुध्यते नेति, प्रमाणोत्थं नेति; न खल्वलातचक्रादिज्ञानेभ्योऽर्थतत्त्वव्यवस्था । स्यादेतत्;

---

[1] न च—C.
[2] उच्यते—A.
[3] सन्मात्रावगमे—A.
[4] तत्त्व—A.
[5] A omits रूप.
[6] अवमर्शोऽपि—C.
[7] Śloka-Vārtika page 171.
[8] बोधेन—A.
[9] हि—C.
[10] अनुवृत्तिव्यावृत्त्याभे—A.
[11] सद्भावः—A.

न प्रत्यक्षं युक्त्यापबाध्यते; सत्यम्; प्रत्यक्षतैव भेदज्ञानस्य नेत्यावेदितम्, यथा क्षेपीयस्सर्वतोदिक्संयोगकारितस्यालातचक्रज्ञानस्य; तत् सदप्यप्रमाणोत्थं प्रत्यक्षसरूपं स्वप्नदृश्यालातचक्रादिज्ञानवन्न तत्त्वावगमनिमित्तम्। ननूक्तेन प्रकारेण प्रमाणादन्यतोऽपि भेदज्ञानस्योदयो न संभवति; को वान्यथाह? न हि परमार्थतो भेदावगमोऽस्ति; यदि स्यात्, कथं भेदोऽपह्नूयेत? अपह्नवे [1]वा कथं तदवगमः? नावगम्यमस्ति, अवगम्यते चेति दुर्घटम्। किं तर्हीदम्? अविद्या विभ्रमः; यथावभासं च वेद्यसद्भावे न विभ्रमः, किं तु सम्यग्ज्ञानम्; असति चावगमोऽनुपपन्नः। तस्मान्न परमार्थतः सत्त्वेन [2]निरुच्यते, नाप्यसत्त्वेन, लोके सिद्धत्वात् सर्वप्रवादेष्वित्युक्तम्।

अपि च ज्ञानद्वयेऽस्मिंश्चतस्रः कल्पनाः संभवन्ति— ज्ञानभेदात् सामान्यव्यक्तिविभागेन वस्तुद्वयम्, यथाहुः संसर्गवादिनः। एकं वा सामान्यविशेषात्मकं [3]वस्तु, यथाहुरनेकान्तवादिनः। विशेषा एव वा वस्तूनि; तेषामात्यन्तिकभेदनिश्चयासामर्थ्यात् तदुपादानस्तद्विषय एवाभेदः कल्पनाज्ञानगोचरः; दृष्टा हि भिन्नेष्वभेदकल्पना 'वनम्' इति—यथाहुरात्यन्तिकभेदवादिनः। अभेदो वा परमार्थः; तस्यानवच्छिन्नस्यानन्तस्य तथा निश्चेतुमशक्तेरनादित्वाच्चाविद्यायास्तदुपादानास्तद्विषया भेदपरिकल्पनाः; दृष्टा हि तरङ्गभेदादभिन्ने चन्द्रमसि भेदकल्पना। तन्नापरीक्ष्य तत्त्वनिश्चयः। तत्र परीक्षायाम्—

न तावद्द्वयमैकात्म्यप्रख्यानानवकल्पनात् ॥ १२ ॥
समवायकृतं तच्चेन्न भेदस्यापरिच्युतेः ॥ १२½ ॥

न तावद् द्वे वस्तुनी सामान्यविशेषौ, प्रख्याभेदात्; समानाधिकरणत्वेन हीमे प्रख्ये जायेते 'सन् घटः, गौः स्वस्तिमती' इति; न व्यधिकरणत्वेन यथा नीलपीतप्रख्ये, यथा वा 'दण्डो देवदत्तः' इति; नापि विशेषणविशेष्यभावेन यथा 'दण्डी' इति, संबन्धस्याप्रतिभासनात्; न च वस्तुभेदविषयत्वे सामानाधिकरण्यमवकल्पते सत्यपि संबन्धे; संबन्धिद्वयं विशेषणविशेष्यत्वेन द्वाभ्यामेकया वा बुद्ध्या [4]गृह्यते, न तु परस्परात्मत्वेन; परस्परा[5]त्मत्वेन चेह प्रतिपत्तिः प्रत्यात्मवेदनीया; विप्रतिपत्तेश्च सामान्यविशे-

[1] A adds तस्य.
[2] निरूप्यते—A.
[3] A omits वस्तु.
[4] अवगृह्यते—A and C.
[5] त्मना—A and C.

षयोर्भेदे; नान्यथा विप्रतिपद्येरन्। सामान्यप्रत्यक्षे च विशेषप्रत्यक्षाभिमानात्; अन्यथा धूमदृष्टाविवाग्नौ परोक्षाभिमानः स्यात्। स्यादेतत्—न संबन्धमात्रादभेदप्रतिपत्तिः, अपि तु संबन्धविशेषात् समवायात्; स हि वस्तुसंश्लेषात्मकः। तन्न, समवायेऽपि ताभ्यां रूपभेदस्यानपायात्, अन्यथा भेदाभावादसं[1]बन्धात्। तथा च नैकात्म्येन प्रख्या युज्यते। अस्ति चेयम्। अतस्तया विरुद्धः प्रख्याभेदो न वस्तुभेदव्यवस्थायै प्रभवति; स्वयं [2]वा व्याहतत्वात्, एकाधिकरणत्वेनोपपत्तेः।

ननु भेदेऽपि परस्परात्मत्वेन प्रतिपत्तेर्निमित्तं समवायः; तस्य खल्वेष सामर्थ्यातिशयः, येन भेदवतामर्थानां भेदं तिरोदधाति; तथा च तेऽभेदेन प्रकाशन्ते। अत्रोच्यते—

भेदान्तर्धानसामर्थ्यं तस्य भेदेऽपि चेन्मतम्॥ १३ ॥
हन्तैकस्यैव तत् किं न यदेवमवभासते ॥ १३$\frac{1}{2}$ ॥

समवायसामर्थ्याच्चेद्भेदवतोरभेदावभासः, हन्त! एकस्यैव वस्तुनः सामर्थ्यविशेषान्ना[3]नावभासोऽभ्युपेयताम्; व्यर्था वस्तुभेदकल्पना; न ह्यस्ति विशेषः—यतो भिन्नयोरभेदप्रकाशसंभवः, नैकस्य नानावभाससंभव इति।

ननु ज्वलनायोगुडादिषु दृष्टमेवंविधं संसर्गस्य सामर्थ्यम्; तत्र दर्शनात् संभवी संसर्गाद्भेदवत्स्वभेदावभासः; नैकस्मिन्नानावभासः, अदर्शनात्। उच्यते—

दृष्टः संसर्गधर्मोऽयं यद्येकमपि वै तथा ॥ १४ ॥
नानावभासते चित्रं रूपमेकं[4] तथा मतिः ॥ १४$\frac{1}{2}$ ॥

दृष्टं खल्वेकमपि विविधावभासम्, यथा चित्रं रूपम्; तद्धि खलु न नीलादिसमाहारमात्रम्; तेषामवयवसमवाये रूपान्तरानभ्युपगमे [5]चावयविनो नीरूपत्वप्रसङ्गात्; न च नीरूपत्वमेवावयविनः; रूपसंस्काराभावे हि न [6]स चाक्षुषः स्यात्; न च रूपिसमवायात् संख्याकर्मादिवच्चाक्षुषत्वम्; एवं ह्युक्तम्—"[7]महत्यनेकद्रव्यसमवायाद्रूपाच्चोपलब्धिः" इति; सर्वश्चेत्थमवयवी नीरूपः स्यात्। अथ नारूपः प्रतीयत इति नायं प्रसङ्गः,

---

[1] संबन्धाभावात्—B.
[2] च—A and B.
[3] नानात्वावभासो—B.
[4] का—B.
[5] C omits च.
[6] A and B omit स.
[7] Cf. Vaiś-Sū. 4-1-6.

चित्रोऽपि तथेति नारूपः; तच्चास्य रूपं नीलपीतादिनिर्भासः। तथा [1]नगर-त्रैलोक्यादिबुद्धयो विविधविषयाकारा निर्भासन्ते भेदाभावेऽपीति विषयाकार-ज्ञानवादिनो मन्यन्ते। न चैक[2]बुद्धितत्त्वाव्यतिरेकाद्विषयाकाराः परस्पर-तोऽपि व्यावर्तन्ते, प्रागेव बुद्धेः।

स्यादेतत्—चित्रमपि रूपं संसर्गादेवैकार्थसमवेतसमवायलक्षणात् तथा-वभासते। [3]तदसत्; यतः—

न च संबन्धिसंबन्धः संसर्गो व्यवधानतः ॥ १५ ॥

संश्लेषो हि संसर्गः; ततश्च परस्पररूपावभासः; स चाव्यवधाने युज्यते; न तु स्वाश्रयाभ्यां व्यवधाने; अवयवावयविरूपयोरेकव्यवधानेऽप्यसंश्लेषः, किमु द्वयव्यवधाने।

किं च

व्यवहारे परोपाधौ सर्वा धीर्व्यावहारिकी।
अयथार्था यदा भावभेदकल्पस्तदा मुधा ॥ १६ ॥

यस्य खलु 'शुक्लो गौः' इत्या[4]दिबुद्धयो व्यवहाराङ्गभूता द्रव्येषु गुण[5]जात्युपाधिनिबन्धनाः [6]तस्यैता न यथावस्तु, जातिगुणद्रव्याणामन्योन्यमर्थान्तरत्वात्। तथा च न वस्तुनिबन्धनो व्यवहारः, बुद्ध्यानुपदर्शितस्याव्यवहाराङ्गत्वात् बुद्ध्युपदर्शितस्य च तथाभावात्। एवं [7]च प्रत्ययविरचितेनैवायमर्थेन व्यावृत्तो व्यवहारोऽनुवृत्तश्चेति व्यर्था वस्तुभेदकल्पना, कल्पितस्यापि तस्य व्यवहारेऽनुपयोगात् इतरस्य चोपयोगात्। यथार्थत्वाय [8]हि व्यावहारिकीणां बुद्धीनां वस्तुभेदः कल्प्यते; कल्पिते [9]च तस्मिन् परोपाधित्वात् तासां नायथार्थत्वपरिहारः।

स्यादेतत्—असति वस्तुभेदे अयथार्थमप्यनुवृत्तव्यावृत्तावग्रहं व्यावहारिकं विज्ञानं नोदेतुमर्हति, बीजाभावात्; न खलु स्थाणुशुक्तिशकलादिषु पुरुषरजतादिविभ्रान्तयो निर्बीजाः, सामान्यनिबन्धनत्वात्। उच्यते—

अयथार्थधियो बीजमवश्यं बाह्यमेव न।
दृष्टस्तिमिरकामादिरान्तरोऽपि ह्युपप्लवः ॥ १७ ॥

---

[1] A omits नगर.
[2] बुद्धित्वाद्व्यति—C.
[3] तदप्यसत्—A.
[4] द्वयः—A.
[5] जात्युपधाननिबन्धनाः—A.
[6] तस्यैतत्—B.
[7] C omits च.
[8] च—B.
[9] अपि च—B.

न विषयदोषादेव सादृश्यादेरयथा[1]र्थज्ञानम्, आध्यात्मिकेभ्योऽपि तु दोषेभ्यस्तिमिरकामशोकादिभ्यः; तत्रासति वस्तुभेदे आध्यात्मिको दोषोऽविद्यालक्षणो व्यावहारिकज्ञानबीजमिति नार्थो वस्तुभेदेन ।

अस्तु तर्हि एकं द्व्यात्मकम्; एवं हि परस्परात्मप्रतिपत्तिश्च सामान्यविशेषयोः कल्पते; वस्तुविपरीतश्च नार्थसामर्थ्यातिशयः कल्पयितव्यः; वस्तुनिबन्धनो व्यवहारः, न व्यावहारिकज्ञानानामयथार्थी[2] वृत्तिः । स्यादेतत्—एकस्य द्व्यात्म[3]कता विरोधवती; एकं [4]च द्व्यात्मकं चेति विप्रतिषिद्धम्[5]; अपि च सामान्यं भेदान्तरानुयायि; ततो व्यावृत्तस्वभावो भेदः; तयोरेकत्वं [6]हि विरोधादशक्यावगमम् । नैतत् सारम् । विरुद्धमिति नः[7] क्व संप्रत्ययः? यत् प्रमाणविपर्ययेण वर्तते; यत्तु यथा प्रमाणेनावगम्यते तस्य तथाभावे विरुद्धत्वाभिधाने कं बलायमाश्रित्य हेतुं विरुद्ध[8]त्वाविरुद्धत्वे व्यवस्थापयेत्? प्रमाणं चैकस्य सामान्यविशेषात्मक[9]तामवगमयति, व्यावृत्त्यनुवृत्तिभ्यां प्रख्यारूपभेदात् ऐकाधिकरण्यावगमाच्च । तदिदमसांप्रतम्; यतो नेदृशां [10]विप्रतिषिद्धार्थज्ञानानां प्रामाण्यमेव युज्यते संशयज्ञानवत्; अन्यथा संशयविषयोऽपि द्व्यात्मा [11]स्यात्, द्व्याभासत्वात्तस्य सामानाधिकरण्याच्च तदवभासयोः ।

अथ मतम्—न संशयिते रूपसमुच्चयावगमः, यथा सामान्यविशेषवति, 'अयं वा, अयं वा' इति प्रतीतेः; मा भूत् समुच्चयः, विकल्पः स्यात् । सोऽपि न, वस्तुनो विकल्पानुपपत्तेः । एकमपि तर्हि न द्व्यात्मकम्, एकस्य द्व्यात्मकताविरोधात् । तत्र यथा संशयज्ञानं विप्रतिषेधादप्रमाणं तथा सामान्यविशेषप्रतिपत्तिरपि, ऐकाधिकरण्यात् ।

स्यादेतत्—न संशयज्ञानं विप्रतिषेधादप्रमाणम्, निर्णयज्ञानेन तु बाधनात् । यत्र तर्हि न निर्णयस्तत्र विकल्पात्मता स्यात् । अपि च यथा बाधायामेकस्याप्रामाण्यं निराकरणात्, एवं विरोधेऽपि द्वयोरेकस्य वा ज्ञानस्य विरुद्धरूपोपग्रहे तद्रूपाधिगत्योरन्योन्यनिराकरणात्; तत्रैकनि-

---

[1] र्थे—B.
[2] र्थे—B.
[3] A omits क.
[4] A and B omit च.
[5] B adds इति.
[6] C omits हि.
[7] न—C.
[8] A omits त्व.
[9] B omits ता.
[10] विप्रतिषिद्धार्थानां—A and B.
[11] B omits स्यात्.

राकरणे इतरस्मान्निश्चयः; परस्परनिराकृ[1]तौ तुल्यबलत्वे सन्देह इति न संशयज्ञानादेकस्य सामान्यविशेषप्रतिपत्तिर्विशिष्यते । तस्मादिहानैकान्तिकं वस्त्वित्येवं ज्ञानं सुनिश्चितमिति स्वपक्षोपवर्णनम् ।

अपि च एकत्वमविरोधेन भेदसामान्ययोर्यदि ।
न द्व्यात्मता भवेदेकतरनिर्भक्तभागवत् ॥ १८ ॥

अवश्यमनेन पदार्थानां भेदाभेदौ व्यवस्थापयता—यथा तावत् सामान्यमभिन्नं विशेषा भिद्यन्त इति—भेदाभेदयोर्लक्षणं वाच्यम्; तत्र [2]रूपविरोधोऽन्योन्याभावो भेदलक्षणम्; विपर्ययोऽभेदलक्षणम्; रूपविरोधाद्ध्यन्योन्याभावपर्यायाद्विशेषा भिद्यन्ते; भिद्यमानेष्वपि तेषु सामान्यमभिन्नम्, विपर्ययात्; तत्र सामान्यविशेषयोर्यदि स्वरूपविरोधोऽन्योन्याभावः, नैकत्वं भेदानामिव परस्परम्; अथ सामान्यविशेषबुद्ध्योरैकाधिकरण्येनोत्पत्तेः स्वरूपविरोधोऽभ्युपेयते, न तर्ह्येकं द्व्यात्मकम्; सामान्यविशेषयोः स्वरूपविरोधाभावादसति भेदे द्वित्वानुपपत्तेः । यथा न सामान्यांशो द्विरूपो विशेषांशो वा, रूपविरोधाभावात्—तत्रैकस्मि[3]न्निर्भक्ते द्वित्वाभावात्—तथा सामान्यविशेषयोरपि सामानाधिकरण्यबुद्धेर्यदि न रूपविरोधः, न[4] [5]परस्पराभावः; द्वित्वं न युज्यते । अथ रूपविरोधः; नैकत्वमिति ।

यदि मतम्—न स्वरूपविरोधान्नानात्वं, तदभावाच्चैकत्वम्, येन सामान्यविशेषयोः स्वरूपविरोधाभावाद्द्वित्वं न स्यादन्यतरस्येव भागस्य; किं तु बुद्धे रूपभेदाभेदाभ्याम्; सामान्यविशेषयोश्च परस्परात्मत्वेन प्रतिपत्तेरसत्यप्यन्योन्याभाव[6]लक्षणे स्वरूपविरोधे बुद्धे रूपभेदाद्द्वित्वम्; अंशे तु रूपाभेदादेकत्वम्; अतो वस्तुनो द्विरूपबुद्धिग्राह्यत्वाद्द्व्यात्मतेति । तत्रोच्यते—

ऐकात्म्यबुद्धेर्भागे चेदेवं वस्तुनि तद्व्यसौ ।
न चेत् कुतस्त्यमेकत्वमस्ति चेद् द्व्यात्मता कथम् ॥ १९ ॥

यदि तर्हि बुद्धेरेकरूपोपग्राहित्वादभेदोंऽशस्य, वस्तु विचार्यम्—

---

[1] ते—B.
[2] रूपे—C.
[3] न्निर्विभक्ते—B.
[4] C omits न.
[5] परस्परात्मताभावो—C; परस्परात्माभावो—B.
[6] प्रमाणे रूपविरोधे—C.